# ॥ षष्ठः सर्गः ॥

॥ श्रीगणेशाय नमः ॥ ॥ शुभं भवतु ॥ ८० ॥

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानम् ।
स भीमभूमीपतिराजधानीं लक्षी (क्ष्यी) चकाराथ रथस्यदस्य ॥ १ ॥

अथ नलस्य दूतक्रिया प्रदर्श्यते । —

अनन्तरं स निषधेषु जनपदेषु प्रधानं मुख्यभूतोऽर्थाद् राजा नलो द्विषां शत्रूणां निषेद्धा निवारको दैत्यारयो देवास्तेषां पतिरिन्द्रस्तस्य दूत्याय दूतकर्मार्थं प्रवृत्तः कृतारम्भः सन् । भीमनाम्नो भूमीपते[1] राज्ञो राजधानीं कुण्डिनाख्यां रथस्यदस्य-स्यन्दनजवस्य लक्षी (क्ष्यी) चकार, दृश्यतामनयत् । कुण्डिनाभिमुखं रथं त्वरितं प्रेरितवानित्यर्थः । लक्षमिव लक्ष्यं लक्ष्यते दृश्यत इति वा लक्ष्यम् । अलक्ष्यं लक्ष्यं चकार । अनेन दर्शने प्रयत्नातिशयः सूचितः । द्विषां निषेद्धेत्यनेन सर्वत्र शत्रुप्रवेशानवकाशो दर्शितः । अनुप्रासोऽलङ्कारः ॥ १ ॥

भैम्या समं नागगणद्वियोगं स दूतधर्मे स्थिरधीरधीशः ।
पयोधिपाने मुनिरन्तरायं दुर्वारमग्नौर्वमिवौर्वशेयः ॥ २ ॥

नन्वेवं विचेष्टमानस्य तस्य दमयन्त्या सममात्यन्तिको वियोगो भविष्यतीत्याशङ्क्याह । सोऽधीशश्चक्रवर्ती दूतस्य धर्मे समाचारे निश्चलमतिः सन् दमयन्त्या सह विरहं न गणितवान्, न मेने । अपि तु तमाद्रियते स्म । कः कस्मिन् कमिवेत्याह । और्वशेयो मुनिरगस्त्याख्यः[2] समुद्रशोषणे स्थिरधीः सन्, दुर्वारं दुर्ज्ञेयमप्यन्तरायं विघ्नमौर्वं वडवानलमिव । समुद्रपाने तन्मध्यवर्ती वडवानलो मां संधक्ष्यतीति यथा स मुनिर्न गणितवांस्तथा स वियोगमित्यर्थः । दुर्वारमन्तरायमिति द्वयं[3] वियोगेनापि संबन्धनीयम् ॥ २ ॥

नलप्रणालीमिलदम्बुजाक्षीसंवादपीयूषपिपासवस्ते ।
तदध्वनीक्षार्थमिवानिमेषा देशस्य तस्याभरणीबभूवुः ॥ ३ ॥

तेऽनिमेषा देवा [१२४. a.] यत्र नलेन सङ्गतास्तस्य देशस्य भूषणं समन्तात् निजप्रभाभिरितस्ततः प्रकाशयन्तस्तत्रैव स्थिता इत्यर्थः । उत्प्रेक्षते । तस्य नलस्य.

1. B. भीमभूपति. 2. B1. -रगस्त्यः 3. B. om. वियोगेनापि संबन्धनीयम्.

योऽध्वा येन पथा स प्रस्थितस्तस्य या वीक्षा[1] तदर्थमिवानिमेषा इत्यावृत्तिव्याख्यानम्। सहजसिद्धमनिमेषत्वमित्युत्प्रेक्षितम्। तत्रस्था एकदृष्टयो नलमागमयांबभूवुरित्यर्थः। कीदृशाः? नल एव प्रणाली काष्ठादिमयी पयोवाहिनी, तत्र मिलत्संयुज्यमानं यदम्बु आख्याः दमयन्त्याः संवादः सन्देशः सादृश्यमेव पीयूषममृतं तत्पातुमिच्छवः। दमयन्तीसन्देशं नलात् सादरं श्रोतुकामा इत्यर्थः। अन्योऽपि दूरस्थ एव नलस्य जलतृणविशेषस्य प्रणाल्यां मिलद् यत् पीयूषं तत्पातुमिच्छति साक्षात् पानस्याघटनात् ॥३॥

तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः।
मनोरथः सिद्धिमिव[2] क्षणेन रथस्तदीयः पुरमाससाद ॥४॥

नलसंबन्धी स्यन्दनस्तां पुरं नगरीं निकटीचकार। केन? क्षणमात्रेण। क इव? मनोरथ इव। कामो यथा। कां सिद्धिं निष्पत्तिमिति दृष्टान्तेन दार्ष्टान्तगुणं साधयति। मनोरथो हि त्वरिततरं सिद्धिं प्रयाति। यां[3] किमित्याह। अमरावतीमेव। कस्य? इन्द्रस्य। कस्याः? भूमेः। भीमो हि भूमीन्द्रः। कीदृशीं कुण्डिनमिति यदाख्यापदमात्रं नामपदमेव, तेन गुप्तां निगूढाम्। गुणैः कृत्वाऽमरावत्येव सा परं नाममात्रेण गोपिता वर्तते। तस्याः खल्वमरावतीतो नाममात्रेणैव भेद इत्यर्थः। भीमोऽपीन्द्र एव। भूमीसंबन्ध-मात्रेण केवलं भेदः। इन्द्रस्य हि दिवा संबन्धः ॥४॥

भैमीपदस्पर्शकृतार्थरथ्या सेयं पुरीत्युत्कलिकाकुलस्ताम्।
नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः क्षताशः[4] ॥५॥

नलस्तां नगरीं नेत्रद्वयेन सादरं दृष्ट्वाऽत्यर्थं क्षणमात्रं निःश्वसिति[5] स्म। यतो देवैः क्षता त्रोटिता[6] भग्नाऽऽशा भैमीप्राप्तितृष्णा यस्य स तथा। कीदृशः। इति हेतोरेवं चोत्कलिकयोत्कण्ठया आकुल उत्सुक इति कथमित्याह। भैम्याः पदयोर्यः स्पर्शः संयोगमात्रं, तेनैव कृतार्थाः सफलारथ्याः पुरमार्गविशेषा यत्र सेयं[7] पुरी। नृप-कुमार्यो हि शैशवे सखीभिः परिवृताः क्रीडावशात् प्रतिरथ्यं सञ्चरन्ति। दमयन्त्या स्थितमात्रमेव चानेन दर्शितम्। जातिरलङ्कृतिः ॥५॥

स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः।
अन्यत्पुनः कम्पमपि स्फुरत्वात् तस्याः पुरः प्राप नवोपभोगम् ॥६॥

---

1. Ś. वीक्ष्या. 2. B1. सिद्धिमवेक्षणेन., Ś. सिद्धिमिवेक्षणेन. 3. B1. यां किं कामिव-
4. Ś. क्षिताशः 5. B1. -श्वसति. 6. Ś. om. त्रोटिता. 7. Ś. om. सेयं पुरी.

तस्य (अस्य) नलस्य वामं चक्षुस्तस्याः पुरो नगरीनायिकाया नवोपभोगं प्रथम-विषयसुखं प्राप। कीदृशं सत्? स्विद्यत् स्वेदयुक्तम्। केन कृत्वा? प्रमोदाश्रुलवेन हर्षाश्रुलेशैः। अन्यच्च कीदृक्? सरोमोद्गमम्। कैः? पक्ष्मभिः निजरोमभिः। [१२४.७] अन्यत् पुनर्दक्षिणं चक्षुः स्फुरत्त्वात् कम्प्रमपि सत्। न केवलं पूर्वधर्मद्वयविशिष्टम्। पुरुषस्य दक्षिणमक्षि स्फुरत् प्रियजनेन सङ्गमं सूचयति। स्त्रियास्तु वामम्। अन्योऽपि नायको नायिकाया नवोपभोगं सात्त्विकैः स्वेदादिभिर्विशिष्टः प्राप्नोति ॥६॥

रथादसौ सारथिना सनाथाद् राजावतीर्याथ पुरं विवेश।
निर्गम्य बिम्बादिव भानवीयात् सौधाकरं मण्डलमंशुसङ्घः ॥७॥

अथ सूतसस्वामिकात् स्यन्दनादसौ नृपोऽवरुह्य नगरीं प्रविष्टः। सूर्यसम्बन्धिनो मण्डलान्निःसृत्य करसमूहश्चन्द्रबिम्बमिवेत्युत्प्रेक्षोपमा। रथरक्षायै सारथिं समादिश्य स्वयं स नगरान्तः प्रविष्ट इत्यर्थः ॥७॥

चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्ववृते न दृश्या।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥८॥

चित्रमाश्चर्यम्। तस्मिन्नवसरे कुण्डिनप्रवेशितुर्नलस्य सा तादृशी मूर्तिः पाञ्चभौतिकी तनुर्दृश्या चक्षुरिन्द्रियग्राह्या न ववृते, न वृत्ता। मूर्तिरवश्यं दृशोर्गोचरीभवति। इयं तु तथा न जातेति चित्रम्। तत्र तु शक्रप्रसादो हेतुरस्त्येव। किञ्च तच्चित्रतरमाश्चर्याधिक्यं बभूव, यद(द)स्य नलस्य मूर्तिस्तथाऽप्यदृश्यत्वे सत्यपि विश्वस्य जगत एका-ऽद्वितीया दृश्यैव दर्शनार्हैव। यां च मूर्तिं कोऽपि न पश्यति, तां सर्वेऽपि पश्य-न्तीति चित्रम्। तत्त्वतस्तु मूर्तिराकृतिः। विश्वे जगत्येकदृश्या दर्शनोचिता रमणीय-तरेत्यर्थः ॥८॥

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम्।
तां गाहमानस्य पुरं नलस्य दृष्टिर्ययौ राजकुलातिथित्वम् ॥९॥

तां पूर्वोक्तां पुरं नगरीं गाहमानस्य विचरतो नलस्य दृष्टिर्दृक् राजकुलस्य नृपमन्दिरस्यातिथित्वमर्हत्त्वं ययौ प्राप। तद्दर्शनात् तस्य महती तुष्टिर्जातेत्यर्थः। किं वस्तुतामित्याह। विस्मयस्य आश्चर्यस्य कल्पलतां पदे पदे, स्थाने स्थाने बहुविधविस्मयजननात्। कैः कृत्वा? जनैर्लोकैः। कीदृशैः? विदग्धैश्चतुरैः न परं जनैर्गृहैश्च। कीदृशैः? मुग्धैर्मनोहरैः ॥९॥

हेलां दधौ रक्षिजनेऽस्त्रसज्जे लीनश्चरामीति हृदा ललज्जे ।
द्रक्ष्यामि भैमीमिति सन्तुतोष दूतं विचिन्त्य स्वमयं शुशोच ॥१०॥

असौ नलोऽस्त्रेषु सज्जेऽबहिते जने रक्षकलोके हेलामनादरं दधौ । तान् सर्वान् स तृणायापि न मन्यते स्म । अहं गूढो भ्रमामीति मनसा जिह्राय । दमयन्त्या सह दर्शनं भविष्यतीति जहर्ष । आत्मानमिन्द्रस्य सन्देशहरं बुध्वा शोकं लेभे इति भावः सङ्करस्वभावः ॥१०॥ [129.a]

अथोपकार्याममरेन्द्रकार्यात् कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥११॥

अनन्तरमसौ नलस्तामुपकार्यां शालाविशेषमविशङ्को निर्भयः सन्नविशत् प्रविष्टः । कस्मात् हेतोः? अमरेन्द्रस्य कार्यात् प्रयोजनात् । कीदृशः? कक्ष्यासु प्रकोष्ठेषु विषये अधिकृतैर्नियुक्तैरदृष्टोऽलक्षितः । किं कुर्वन्? दमयन्तीं द्रष्टुमिच्छुः सन् बहु भूयो दिक्ष्वाशासु दृष्टिं ददत् । 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्ये [1]भबधने' — [इत्यमरः] । उपकार्योपकारिका तामित्यस्य यन्नेत्यनेन व्यवहितेन वक्ष्यमाणेन संबन्धः ॥११॥

अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम् ।
दृशं ददे(दौ) विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः ॥१२॥

स राजसिंहो नृपोत्तमोऽतिक्रान्तायामपि द्वारि द्वारभूमावाश्चर्यनिश्चलां दृष्टिं व्यापारितवान् । किं कृत्वा? कण्ठं विभुज्य विवर्त्य । कया? अयं कोऽन्तरविदितः प्रविशतीत्यन्यजननिषेधकाणां द्वारपालानां वाचा । यतः स विभुः प्रभविष्णुः । न खल्वेतत् पूर्वमेतेनात्मानं प्रत्येतादृशि वचांसि श्रुतानि[2] सन्ति[3] । तेन हि ज्ञातमहममीभिर्लक्षितोऽतो मामयं कोऽन्तः प्रविशतीति [4]निवारयतीति नैतस्त्वन्यमेव कञ्चनजनं प्रति तथोक्तम् । अथ च स राजा सिंहः । सिंहश्च दूरं गत्वा कण्ठं विभुज्यातिक्रान्तेऽपि पश्चाद् भागे दृशं दत्ते । तदेतल्लोके सिंहावलोकनं प्रसिद्धः । निवारयन्तीति निवारकाः । अन्येषां निवारका अन्यनिवारकाः ॥१२॥

अन्तःपुरान्तः स विलोक्य बालां काञ्चित् समा[5]लब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या संघट्टमासाद्य चमच्चकार ॥१३॥

1. B1 इभबन्धने. 2. B1 भवन्ति. 3. B. ते.
4. B1 om. निवारयतीति ------ प्रसिद्धः । 5. B1 — लश्रुम —

स नलोऽवरोधमध्ये काञ्चिन्मुग्धां वधूमुद्वर्तयितुमुद्घाटयितुं[1] सक्रियकां विलोक्य निमीलिताक्षः सङ्कोचितनयनपुटः[2] सन्, परया सह संघट्टं[3] संयोगं प्राप्य चमत्करोति स्म। समालम्भो विलेपनम्। "सक्थि क्लीबे पुमानूरुः" [ ]। केचिदूरुशब्दं अङ्घ्रिवाचकं स्त्रियामाहुः। विलोकनक्रियाया निमीलनक्रियाया सहैककर्तृकता। एतेन तस्य सत्पुरुषत्वकथनम्। एवमुत्तरत्र ॥१३॥

अनादिसर्गस्रजि वानुभूता चित्रेषु वा भीमसुता नलेन।

जातेव यद्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥१४॥

नलेन सा भैम्येव सर्वासु दिक्षु दृष्टा। कीदृशी? अनुभूता परिचितीकृता वा। क्व? अनादिरारम्भरहिता या सर्गस्रक् सृष्टिमाला, तस्याम्। तयोर्हि दाम्पत्यं सृष्टि-परम्परायां को जानाति कतिकृत्वो जातमस्ति[4]। वाऽथवा चित्रेष्वालेख्ये-[। ख. ६]-षु परिचिता। यद्वा अथवा जितशम्बरस्य कामस्य शाम्बरीशिल्पं मायाविज्ञानकौशलं जाता सम्पन्ना सती, दिक्ष्वलक्षीति संबन्धः। वा शब्दत्रयसमुच्चये गौणमुख्यभाव-निषेधपरम्। कामवशात् तेन सा सर्वत्र[5] दृष्टा, हेतुद्वयपरिशीलनाद् वेत्यर्थः ॥१४॥

अलीकभैमीसहदर्शनान्न तस्यान्यकन्याप्सरसो रसाय।

भैमीभ्रमस्यैव ततः प्रसादैर्भैमीभ्रमस्तेन न तास्वलम्भि ॥१५॥

अन्याश्च ताः कन्याश्च ता एवाप्सरसो दिव्यस्त्रियस्तस्य नलस्य रसाय प्रीतये न जाताः। कस्मात्? भ्रान्तभैमीवीक्षणात्। अपराः कुमार्योऽतिसुन्दर्योऽपि भ्रान्त-भैमीं पश्यतस्तस्य मनो न जहुरित्यर्थः। ततो हेतोस्तासु विषये तेन दमयन्तीभ्रान्तिर्न प्राप्ता। कैः कृत्वा? भैमीभ्रमस्य दमयन्तीप्रमोहस्य प्रसादैस्तुष्टिभिः। मिथ्याज्ञानविलोकिताया भैम्या एव स प्रसादोऽस्य यदसौ तासु भैमीभ्रमं न लेभे ॥१५॥

भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्तात् विरहाद्विहस्तः।

स तामलीकामवलोक्य तत्र क्षणादपश्यन् व्यषदद्विबुद्धः ॥१६॥

स नलस्तां मिथ्यारूपां दृष्ट्वा विबुद्धो, जागृतः। क्षणात् तत्कालमेव तत्रैव[6] तां भैमी-मपश्यन् सन् व्यषदत्, विषादं प्राप। कीदृशः सः? विहस्तो व्याकुलः। कस्मात्? विरहात्। कीदृशात्? ~~स्व~~ दत्तः स्वहस्तोऽवलम्भाय निजपाणिर्यस्मै तथा तस्मात्। केन? मन्मथेन। क्व? हृदि। कीदृशे? भैम्यां गताऽलब्धिसम्भावना यस्य तस्मिन् ॥१६॥

---

1. B1. -घाटित. 2. B1. नयनः 3. B1. सम्प्राघट्टं. 4. B. -मसि. 5. B. सर्वतं. 6. B1. तत्र

प्रियां विकल्पोपहितां स यावद् दिगीशसन्देशमजल्पदल्पम् ।
अदृश्यवाग्भीषितभूरिभीरुभ्यो रवस्तावदचेतयत्तम् ॥१७॥

मिथ्याज्ञानोपस्थितां भैमीं स यावत् स्तोककं दिगीशानां सन्देशं वाचिकं जजल्प विरं स्थूलमिवाचष्ट। तावद्रवः शब्दस्तमचेतयत् प्राबोधयत्। कीदृशः? अदृश्यस्यादृश्यया वाचा भीषिता[1] भायिता या भूरयो[2] बह्व्यो भीरवः कन्यकास्ताभ्यो भवति यः स तादृशः॥१७॥

पश्यन् स तस्मिन् मरुतापि तन्व्याः स्तनौ परिस्प्रष्टुमिवास्तवस्त्रौ ।
अक्षान्तपक्षान्तमृगाङ्कमास्यं दधार तिर्यग्[3]वलितं विलक्षः ॥१८॥

स नलस्तस्मिन्नन्तःपुरे कस्या अपि कृशाङ्ग्याः स्तनौ वायुनाऽपि स्पर्शसुखमनुभवितुमिवास्तवस्त्रौ क्षिप्ताच्छादनौ पश्यन् सन्नास्यं मुखं तिर्यग्वलितं तिरश्चीनं विवर्तितं दधे। कीदृशम्? अक्षान्तोऽसोढः पक्षान्तस्य [4]पूर्णिमाया मृगाङ्कश्चन्द्रो येनेति। पापशङ्काजनितश्यामिकासद्भावसूचनम्। अन्योऽपि नायकः स्प्रष्टुकामस्तन्व्याः स्तनावस्तवस्त्रौ करोति। मरुताऽपि तदर्थमिव तौ [130·a] निरस्ताच्छादनौ कृताविति भावरहितस्यापि वायोर्नायकत्वसम्भावनम्। अथ च मरुता देवेनापि मनुष्यस्य का कथेत्यर्थः। सोऽवश्यं [5]तरुण्याः स्पर्शलोभेन वस्त्रं निरस्यति ॥१८॥

अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः।
न कालसारं हरिणं तदक्षिद्वयं प्रभु[6]र्बद्धुमभून्मनोभूः ॥१९॥

प्रथमं तत्त्वपक्ष एव व्याक्रियते। यथा मनोभूः कामस्तस्य नलस्याक्ष्णोर्द्वयं बद्धुं संयमितुं तद्वशीकर्तुं प्रभुर्नाभूत्, समर्थो न बभूव। कीदृशम्? कालो गुणः सारो यत्र तत् कालसारम्। कृष्णगुणप्रधानम्। पुनः कीदृशम्? हरिणं धवलम्। विशेषणद्वययोगात् कालधवलमित्यर्थः। कैः कृत्वा? बद्धुं प्रभुर्नाभूत्, नाभवत् इत्याह। बालावलीनां मुग्धवधूश्रेणीनां गुणौघैः। गुणानां सौन्दर्यादीनामोघा राशयस्तैः। न केवलं गुणौघैर्वलितैर्विवर्तनैश्च कथं यथा भवति, तथा विस्तृतवागुरोऽपि यथा भवतीति वलनक्रियाविशेषणम्। वाक् च उरश्च वागुरसी। विस्तृते वितते वागुरसी यत्र तद् विस्तृतवागुरः। क्व? अन्तःपुरे निशान्ते। अनेन च संविधानकेन कामवशात् मुनेरपि नेत्रे बध्येते। तस्य तु न बद्धे इति सत्पुरुषत्वकथनम्। अथ च छलेनार्थान्तरम्। मनोभूर्नाम मृगयुस्तदक्षिद्वयमेव कालसाराक्षं[7] हरिणं मृगं बद्धुं संयमितुं प्रभुर्नाभूत्। कीदृशः?

---

1. B1·B· भापिता · 2. B1· बध्यो · 3. B· कलितं · 4. B1· पूर्णिमामाया · 5. B· तस्यास्तयो·
6. B· बन्धु · 7. B1 · – साराक्ष्यं ·

अन्तःपुरे नगरमध्ये विस्तृता प्रसारिता वागुरा मृगबन्धिनी येन स तथाभूतोऽपि। कैः कृत्वा? बद्धुं प्रभुर्नाभूदित्याह। गुणानां रज्जुविशेषाणामोघाः प्रवाहा इव गुणौघा दूरप्रसृता गुणास्तैः। कीदृशैः? वलितैः कराभ्यां वर्तितैः सृष्टैरित्यर्थः। कासाम्? वालाः केशास्तासामावलयः सञ्चयास्तासाम्। अयमर्थश्चाखेटकानां[1] विदित एव। अत्र पक्षे त्वन्तःपुरे नगरमध्य इति सौकर्यमात्रकथनम्। अथवा पुरसमीपोपलक्षणमेतत्। न ह्येवंविधा मृगया पुरमध्ये भवति। यद् वा गृह्यकोऽयं कालसारो[2] हरिणोऽयं[3] तं प्रमत्तत्वात् स्वैरं प्रबद्धुं नगरान्तरेव प्रभुर्नृपोऽश्वादिवालवलितगुणमयीं वागुरां विस्तृणाति ॥१९॥

दोर्मूलमालोक्य कचं रुरुत्सोस्ततः कुचौ तावनुलेपयन्त्याः।

नाभीमथैव श्लथ[4]वाससोऽनु निमील दिक्षु क्रमकृष्टचक्षुः ॥२०॥

एष नलोऽनु पश्चान्निमील निमिषति स्म। कीदृशः सन्? क्रमेण परिपाट्या कृष्टं संहृतं चक्षुर्दृष्टिर्येन सस्तथा। कासु? दिक्षु चतसृषु आशासु। सर्वाभ्यो दिग्भ्यो दृष्टिमाकृष्य नेत्रे संमील्य स्थित इत्यर्थः। तमेव क्रममाह। प्राच्यां दिशि कचं केशकलापं रुरुत्सो रोद्धुमिच्छोर्दोषोर्बाह्वोर्मूलं कक्षाप्रदेशमालोक्य। त-[130-6]-तोऽनन्तरं दक्षिणस्यां दिश्यनुलेपयन्त्याश्चर्चयन्त्यास्तौ तादृशौ कुचावालोक्य। अथानन्तरं प्रतीच्यां दिशि श्लथवाससः स्रस्तजघनाम्बराया नाभीमालोक्यानु पश्चादुत्तरस्यां दिशि अनिष्टावलोकनभयान्निमीलेति संबन्धः। दिक्ष्विति चक्षुष आधारत्वमेव विवक्षितं न त्वपादानत्वम् ॥२०॥

मीलन्न शेकेऽभिमुखागताभ्यां धर्तुं निपीड्य स्तनसान्तराभ्याम्।

स्वाङ्गान्यपेतो विजगौ स पश्चात्पुमङ्गसङ्गोत्पुलके पुनस्ते ॥२१॥

स नलः पूर्वप्रदर्शितसंविधानवशात् मीलन्नेत्रे सङ्कोच्य तिष्ठन् सन्, अभिमुखं परस्परसम्मुखमागताभ्यामायाताभ्यां स्त्रीभ्यां निपीड्य गाढमालिङ्ग्य धर्तुं न शेके, ग्रहीतुं न पारितः। यतः कीदृशीभ्याम्। स्तनसान्तराभ्यां विपुलकुचव्यवहिताभ्याम्। पश्चात् किं सञ्जातमित्याह। स नलोऽपेतो विश्लिष्टः पश्चादनन्तरं परस्त्रीस्पर्शजनितपातकसम्भावनया स्वाङ्गानि निजावयवान् विजगौ निनिन्द। ते पुनर्द्वेऽपि स्त्रियौ पश्चात् पुंसोऽङ्गानां सङ्गवशादुत्पुलके उदितरोमाञ्चे जाते। अभिमुखागताभ्यामर्थाद् बाहुप्रसारणपुरःसरमन्योऽन्यालिङ्गनेच्छया ॥२१॥

---

1. B. -खेटकानां प्रसिद्धमेव विदित. 2. B. -सारहरिणो. 3. B. om. अयं. 4. B. श्लथः

निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन् कटाक्षैः ।
स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः परतोऽतिगुर्वी ॥२२॥

यतः स नलो निमीलनस्पष्टविलोकनाभ्यां व्यथितोऽतस्ता रागदर्शीव व्यसनीव कटाक्षैर्निरीक्षमाण[1]: सन्नत्यर्थं जिह्राय । युक्तोऽयमर्थः । यतः सतां महात्मनां स्वत आत्मनः सकाशादतिगुर्वी[2] गरीयसी ह्रीः । कुतः सकाशादतिगुर्वी ? परतोऽन्यस्मात् । उत्तमा यथा स्वस्य लज्जां कुर्वन्ति तथा न परस्य । आत्मा हि सर्वकर्मसु साक्षी वर्तते ॥२२॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्भ्रान्तेन कान्तेन रतेर्निदिष्टः ।
मोघः शरौघः कुसुमानि नाभूत् तद्धैर्यपूजां प्रति पर्यवस्यन् ॥२३॥

कुसुमान्येव शराणामोघो निकुरम्बं[3] मोघो निरर्थको नाभूत् । किं कुर्वन् ? तस्य नलस्य धैर्यं सत्त्वाधिक्यं चेतसः स्थिरत्वं तस्य पूजाऽर्चा, तां प्रति पर्यवस्यन् परिणमन् । कुसुमैर्हि पूजाऽपि सम्भवति । कीदृशः शरौघः ? निदिष्टो व्यापारितः । केन ? रतेः कान्तेन कामेन । कीदृशेन ? भ्रान्तेन प्राप्तभ्रमणेन । कैः ? कटाक्षैः । अर्थान्नलस्य । कथम् ? अनु लक्षीकृत्य । काम् ? रोमाञ्चिताङ्गीं कण्टकिततनुम् । अयमर्थः । काचन बालाऽपि केनापि कारणेन रोमाञ्चिताङ्गी वर्तते । नलस्तु पूर्वप्रदर्शितयुक्तिवशात् तां कटाक्षैरीक्षमाणो-[ऽनुरक्तो]ऽस्ति । अथ कामस्य भ्रमोऽभूत् 'नूनमयमस्यामनुरक्तोऽस्ति' इति । तं प्रति तेन पुष्पाण्येव बाणा मुक्ताः । तेन तां तादृशीमपि विलोक्य धैर्यं न त्यक्तमित्यर्थः । रोमाञ्चिताङ्गीमनु लक्षीकृत्य तस्य ये कटाक्षास्तैर्भ्रान्तेनेति संबन्धः । वासनाऽर्थस्तु सूक्ष्मबुद्धिगम्योऽत्र ॥२३॥

हित्वैव वर्त्मैकमिह भ्रमन्त्याः स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य ।
चतुष्पथस्याभरणं बभूव लोकावलोकाय सतां स दीपः ॥२४॥

स नलो लोकानां स्वर्गादीनामवलोकाय सतां साधूनां प्रकाशकत्वाद् दीप इव दीपः चतुष्पथस्यान्तःपुरसंबन्धिन आभरणं बभूव । अत्र स्थित इत्यर्थः । किं कृत्वा ? एवं ज्ञात्वा । कथमित्याह । इह भ्रमन्त्याः स्त्रियाः स्पर्शः सुत्यजः । किं कृत्वा ? एकं वर्त्म हित्वैव । अन्योऽपि सतां पुण्यवतां यो लोकानां जनानामवलोकाय दर्शनाय प्रदीपः प्रद्योतकः स चतुष्पथस्य नगरे प्रसिद्धस्याभरणं भवति । सन्तो हि निशि चतुष्पथे दीपं दापयन्ति । तेन च तद्दतीव शोभते ॥२४॥

---

1. अ. निरीक्ष्य- 2. अ. गुरुवी 3. अ. -रम्बं

उद्धूर्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यवृतद्द्रुतैव ।
वियोगिवैरात्कुचयोर्नखाङ्कैरर्धेन्दुलीलैर्गलहस्तितेव ॥२५॥

उद्धूर्तयन्त्याः समा[1]लम्भमानाया वक्षसि निपतनं कृत्वा राज्ञो दृक् शीघ्रमेव निवृत्तेत्यत्र सत्पुरुषत्वमेव हेतुः । अत्र निमित्तान्तरारोपरूपामुत्प्रेक्षामाह । खण्डेन्दु-सदृशैः स्तनयोर्वर्तमानैः करजव्रणैर्गलहस्तिता गले गृहीत्वा निष्कासितेव । कस्मात्? वियोगिवैरात् । विरहिभिः सार्धं चन्द्रस्य वैरं प्रसिद्धम् । न्यवृतदिति द्युतादित्वाद्‌ण्‌ । गलहस्तं करोति गलहस्तयति गलहस्तयते स्म । गलहस्तितेत्यौपचारिकः ॥२५॥

तन्वीमुखं द्रागधिगत्य चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम् ।
द्वयं दृढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ॥२६॥

तस्य नलस्य विरहिणो नेत्राभ्यां कृशाङ्ग्या वदनमेव चन्द्रं प्राप्य झटिति सङ्कु-चिताभ्यां सद्भ्यामुभयं दृढतरं विहितम् । किं द्वयमित्याह । तस्य तन्वीमुखस्येन्दुता चन्द्रत्वं च, स्वस्य सरोजता कमलत्वं च, कमलमेव हि चन्द्रं प्राप्य निमीलति । चन्द्र एव कमलनिमीलनहेतुः । कार्यदर्शनात् कारणमनुमीयते ॥२६॥

चतुष्पथे तं विनिमील्य ताक्षं चतुर्दिगेत्ताः सुखमग्रहीष्यन् ।
संघट्ट्य तस्मिन् भृशभीनिवृत्तास्ता एव तद्वर्त्म न चेददा[2]स्यन् ॥२७॥

चतस्रश्च ता दिशश्च चतुर्दिशस्ताभ्यः सकाशादेता आगताश्चतस्रो नायिकास्तं राजानं चतुष्पथे चतुर्णां पथां समाहारे विशेषेण निमीलिताक्षं सङ्कोचितचक्षुषं सन्तं सुखमनायासेनैवाग्रहीष्यन् धारयेयुः । चेद्यदि तस्मिन्नेव राज्ञि संघट्ट्य सं-[13. 6]-श्लेषं प्राप्य भृशमत्यर्थं च काभीस्तया निवृत्ताः प्रतीपं गताः सत्यस्ता एव स्त्रियस्तस्य वर्त्म प्रसरणं मार्गं नादास्यन्न वितरेयुरिति क्रियातिपतनम् । एता इत्याङ्पूर्व इण् ॥२७॥

संघट्टयन्त्यास्तरसात्मभूषाहीराङ्कुरप्रोतदुकूलहारी ।
दिशा नितम्बं परिधाप्य तन्व्यास्तत्पापसन्तापमवाप भूपः ॥२८॥

भूपः क्षितिपस्तन्व्या स्त्रिया नितम्बं कटीतटं दिशा परिधाप्य लक्षणया नग्नी-कृत्य, तस्य कर्मणो यत्पापं तस्य सन्तापमवाप । तदविहितं कर्मैव विधाय पापेनेव सम्यक् तापं लेभे । तत्त्वतस्तु सत्पुरुषत्वादेव । परस्त्रियं दिवा नग्नीकृत्य सन्तप्तः ।

1. ष. समत्वभि. 2. A. दास्यन्.

भूप इति साभिप्रायम्। तेन ह्यन्येऽप्येवमाचरन्तो भुवि निग्राह्याः। यतः स कीदृशः?
आत्मनो भूषाया बाहुकटकादेर्हीराङ्कुरेषु वज्रशकलकोटिषु प्रोतं संस्यूतं दुकूलं पट्टाम्बरं हरत्येवंशीलः। कथम्? तरसा बलेन। तन्व्याः संघट्टयन्त्याः। अर्थात् तेनैव सह संश्लेषं प्राप्नुवत्याः। अन्योऽपि स्त्रियं नञ्जयित्वा तदुत्थेन पापेनावश्यमिह चामुत्र च सन्तापं विविधं दुःखं प्राप्नोति ॥२८॥

हतः कयाचित्पथि कन्दुकेन संघट्ट्य भिन्नः करजैः कयापि।
कयाचनाक्तः कुचकुङ्कुमेन सम्भुक्तकल्पः स बभूव ताभिः ॥२९॥

स नलस्ताभिर्युवतिभिः सम्भुक्तकल्प ईषत्परिसमाप्तसम्भोगविषयीकृतोऽभूत्। तथा हि- कयाचित् पथि वर्तमानः सन् कन्दुकेन वीथ्याहतः। कयाऽपि संघट्टं प्राप्य करजैर्भिन्नो दारितः। कयाचन कुचकुङ्कुमेन कृत्वा अक्तो लिप्तः। अयमेव च प्रायेण सम्भोगयोगः। कयैव कयाचन। किमः सर्वविभक्त्यन्ताच्चिच्चनौ। अक्त इत्यञ्ज् धातुः ॥२९॥

छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः।
तच्चिन्तयान्तर्निरयायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥३०॥

स नलो गच्छन् सन्, कयाऽपि तन्व्या निजे हारे छायामयः प्रतिबिम्बरूपः प्रेक्षितः। अनन्तरं नेक्ष्यमाणो न दृश्यमानः सन्, स्वस्यात्मनः एव हृदयमन्तःकरणं प्रविष्टः सङ्क्रान्तश्चारु सुष्ठु निरयायि निश्चितः। कया? तच्चिन्तया तद्ध्यानेन सा हि तमद्भुतरूपं हारप्रतिबिम्बितमिष्टं ध्यायन्ती वर्तते। तच्चिन्तयेत्यन्तः प्रवेशकरणं परम्परया। नु निश्चयेन ॥३०॥

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमू रतीशः।
रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतिरभूत्कथञ्चित् ॥३१॥

तस्य बह्वी छाया, तच्छायं, तस्य भूयान् प्रतिबिम्बस्तेन निपीतं धैर्यं सत्त्ववत्ता यासां ता एवंभूताः। अमूः स्त्रीः रतीशः कामः प्रत्येकमेकैकं कृत्वा आलिङ्गति स्म। तस्य प्रतिबिम्बगतं रू-[132-a]-पं दृष्टवतीनां तासां सर्वासामपि कामः सम्भूतेत्यर्थः। तत्र हेत्वन्तरमाह। निश्चितं केनापि प्रकारेणामूषु युवतीषु विषये न निर्णीतिरभूत् निश्चितनिजभार्यः। यतः प्रकर्षेण रतिप्रतिद्वन्द्विभ्यो रतिप्रतिद्वन्द्वितमास्तासु। अतिशयेन रतिसदृशीषु रूपादिनिर्णये स्पर्शेन निर्णिनीषन्नित्यर्थः। कामोऽत्र देही च्छलपक्षे तच्चतस्त्विच्छारूपं एव ॥ ॥३१॥

तस्मादृश्यादपि नातिबिभ्युस्तच्छायरूपाहितमोहलोलाः ।
मन्यन्त एवादृतमन्मथाज्ञाः प्राणानपि प्रांशुदृशस्तृणानि ॥३२॥

प्रांशुदृशो बध्वस्तस्मान्नलाददृश्यादपि नातिबिभ्युर्भयं प्रापुः। अदृश्याद्दृश्यचेष्टां कुर्वतोऽवश्यं स्त्रियो बिभ्यति। यतस्तच्छाये तस्य प्रतिबिम्बे यद्रूपं रामणीयकं तेनाहितो विन्यस्तो यो मोहो भ्रमस्तेन लोलाश्चलचित्ताः। यतः स्वान् प्राणानपि तृणानि मेनिरे। निजानसूनपि तृणवदुज्झितुमैच्छन्नित्यर्थः। कीदृश्यः ? आदृता स्वीकृता मन्मथस्याज्ञा आदेशो यका(या)भिस्ताः। कामवशवर्तिनो हि मरणमप्यङ्गीकुर्वते ॥३२॥

जागर्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन्विससर्प कम्पः।
द्रुतं द्रुते तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः ॥३३॥

चारुदृशां स कम्पः स्वहस्तितः स्वहस्ते कृतः स्वतां नीत इत्यर्थः। कया ? तस्य पदयोर्यः शब्दस्तस्माद्भीतिस्तया। क्व सति ? तस्मिन्नृपे द्रुतं शीघ्रं द्रुते धाविते सति। स क इत्याह। यः कम्पः पुरा जागर्ति जजागार। कीदृशीनाम् ? तस्य छायां प्रतिबिम्बं पश्यन्तीति, तच्छायदृशस्तासाम्। तस्मिन् स्पृष्टे स्पर्शविषयीकृते सति यो विससर्प प्रसृतस्तस्य प्रतिबिम्बं दृष्टवतीनां यः प्रथममुद्भूतस्तदनु तं स्पृष्ट-वतीनां संसृतः। पश्चात् तस्य शीघ्रं धावितस्य पदशब्दं श्रुतवतीनां यद् भयं तेन स कम्पः। समन्ताद् बहलतरीभूत इत्यर्थः। स्वहस्ते करोतीति स्वहस्तयति ॥३३॥

उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिबापि दृष्टिः।
अस्मै च रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि लोम ॥३४॥

तासां युवतीनामङ्गं शरीरं स्पृष्टं नलस्याङ्गं येन तत् तादृक् सदुल्लास्यतामुल्लासं भजताम्। यूनोऽङ्गस्पर्शे युवतीनामङ्गस्योल्लासो युक्तः। नलस्य छायां प्रतिबिम्बस्तस्य पिबा दृष्टी दृष्टिरपि तासामुल्लास्यतां यूनो रूपातिशयदर्शने युवतीनां दृष्टेरप्युल्लासो युक्तः। च पुनः अस्मै अर्थाय रत्याः पत्या कामेनानर्ति विलसितम्। अस्मै कस्मै तदाह। यल्लोमा(ऽ)हर्षि तनूरुहं हर्षितं सम्पन्नम्। यतः कीदृशम्। छेदे कर्तनेऽप्यबोधम-चेतनम्। रोमहर्षे स्मर एव हेतु-[132 ·6]-रित्यर्थः। लसधातुश्चुरादिरिनन्तः। कर्म-कर्तृविवक्षा च। रतिपतिरेव वा प्रयोजकः कर्ता। तदा लसश्लेषनक्रीडनयोरिति स्वादेः ॥३४॥

यस्मिन्नलस्पृष्टकमेत्य दृष्टा भूयोऽपि तं देशमगान्मृगाक्षी।
निपत्य तत्रास्य धरारजःस्थे पादे प्रसीदेति शनैरवादीत् ॥३५॥

मृगाक्षी काऽपि यस्मिन् देशे नलस्य स्पृष्टकं प्रासङ्गिकमालिङ्गनमेत्य प्राप्य हृष्टा मुदिताऽभूत्। भूयोऽपि पुनरपि तं देशमगात्। अर्थात् तल्लाभलोभात्। तत्र गत्वा किं चकारेत्याह। तत्र देशेऽस्य नलस्य धरारजःस्थे भूरेणुगते पदपाठे पदप्रतिबिम्बे निपत्य लगित्वा प्रसीद निजाङ्गसङ्गेन मामनुगृहाणेति शनैर्निभृतमवादीदिति ॥३५॥

भ्रमन्नमुष्यामुपकारिकायामायास्य[1] भैमीविरहात् कृशीयान्।

असौ मुहुः सौधपरम्पराणामधत्त विश्रान्तिमधित्यकासु ॥३६॥

असौ नलः अमुष्यां पूर्वोक्तायामुपकारिकायां गृहविशेषे भ्रमन् चङ्क्रम्यमाणः सन्, [2]आयास्य, आयासं प्राप्य सौधपरम्पराणां सुधाधवलितहर्म्य[3]धरपङ्क्तीनामधित्यकासूपरितनभूमिषु। पुनः पुनर्विश्रान्तिं विश्रमणं खेदापनोदहेतुमधत्त। यतो दमयन्तीवियोगात् कृशतरः। अधित्यकास्वित्यनेन सौधानां भूधरत्वमाक्षिप्तम् ॥३६॥

उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी।

तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय ॥३७॥

तेन नलेन तथैव तेनैव प्रकारेणाभिलिख्य चित्रकर्मविषयतां नीत्वोपहृतस्वहारा कण्ठक्षिप्तनिजैकावलीका सती कस्या युवत्या विस्मयाय नाजनि, अपि तु सर्वासामाश्चर्यमजनयत्। तथा कथमित्याह। हंसेन नलिन्या दले उल्लिख्योत्कीर्य तस्मै नलाय यथैवादर्शि दर्शिता। तस्मायिति प्रयोज्य कर्तृत्वाविवक्षायां तादर्थ्यविवक्षा ॥३७॥

कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना।

सालिख्य तेनैक्ष्यत यौवनीयद्वाःस्थामवस्थां परिचेतुकामा ॥३८॥

सा दमयन्ती तेन [4]नलेनालिख्य चित्रयित्वा दृष्टा। किं कर्तुकामा? परिचेतुकामा परिशीलयितुमिच्छन्ती। काम्? दशामवस्थाम्। या किं वस्तुदशा तामाह। द्वारि तिष्ठतीति द्वाःस्था प्रतीहारी। यौवनस्येयं यौवनीया। यौवनीया चासौ द्वाःस्था च ताम्। प्रतीहारीधर्ममाह। किं कुर्वन्ती। कौमारगन्धीनि शैशवलेशानि वृत्तानि चरित्राणि निवारयन्ती। यतः कीदृशी? रोमावलिरेव वेत्रं वेत्रदण्डचिह्नं यस्याः सा। प्रतीहारी गृहीतवेत्रा सती राजभवनान्तःप्रवेष्टु-[133-a]-कामान् जनान् निवारयति त्रयोदशवर्षदेशीया सा तेनालिखितेत्यर्थः ॥३८॥

---

1. B1. -यस्य. 2. B1. आयस्य. 3. B1. हर्म्यपङ्क्ती. 4. D. -नाभिलिख्य.

पश्याः पुरन्ध्रीः प्रति सान्द्रचन्द्ररजः कृतक्रीडकुमारचक्रे।
चित्राणि चक्रेऽध्वनि चक्रवर्तिचिह्नं तदङ्घ्रिप्रतिमासु चक्रम् ॥३९॥

सान्द्रं घनं चन्द्रस्य कर्पूरस्य यद् रजो रेणुस्तत्र कृतक्रीडं विहितविहरणं कुमाराणां नृपलनयानां चक्रं समूहो यत्र तस्मिंस्तथाविधेऽध्वनि वर्तमानासु तदङ्घ्रिप्रतिमासु नलपदप्रतिबिम्बेषु वर्तमानं चक्रवर्तिनः सार्वभौमस्य चिह्नं चक्रं रेखामयं पश्याः पुरन्ध्रीः प्रति द्रष्ट्रीणां स्त्रीणां चित्राणि चक्रे, आश्चर्यातिशयमजनयत् ॥३९॥

तारुण्यपुण्यामवलोकयन्त्योरन्योऽन्यमेणेक्षणयोरभिख्याम्।
मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ॥४०॥

स क्षणमात्रमकस्माद् भवान्तर्धानचित्रायाभवत्। किं कुर्वन्? मध्ये गच्छन् सन्। कयोः एणेक्षणयोर्मृगदृशोः। किं कुर्वन्त्योः। तारुण्यपुण्यां यौवनसुकृतमयीमभिख्यां शोभामन्योऽन्यं परस्परमवलोकयन्त्योरित्यदृश्यः पदार्थो व्यवधायको भवति, न वेति, न वेद्मि ॥४०॥

पुरःस्थितस्य क्वचिदस्य भूषारत्नेषु नार्यः प्रतिबिम्बितानि।
व्योमन्यदृश्येषु निजान्यपश्यन् विस्मित्य विस्मित्य सहस्रकृत्वः ॥४१॥

क्वचिदस्याग्रे वर्तमानस्यालङ्कारमणिषु दृश्येतरेषु वर्तमानानि प्रतिच्छायकानि स्त्रियोऽनेकवारान् भूयो भूयो विस्मयं गत्वा नभसि ददृशुरेतदपि न वयं सम्यक् विद्मः। अदृश्येषु वर्तमानं प्रतिबिम्बं कथमिव दृश्यते ॥४१॥

तस्मिन्निषज्यार्धपथान्तपातं तदङ्गरागच्छुरितं निरीक्ष्य।
विस्मेरतामापुरविस्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः ॥४२॥

चन्द्रानना आश्चर्यवत्तां लेभिरे। किं कुर्वत्यः? अन्योन्यं प्रति व्यापारितं कन्दुकं स्मरन्त्य एव। किं कृत्वा? तस्मिन्नले लगित्वाऽन्तराल एव प्राप्तपतनं, तस्य चाङ्ग-लेपेन कुङ्कुमादिना च्छुरितं कर्बुरितं दृष्ट्वा ॥४२॥

पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाऽप्यनीक्षानियमव्रतिन्यः।
छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः ॥४३॥

महिष्यो राजदारा भुवि वर्तमानासु च्छायासु प्रतिबिम्बेषु वर्तमानं तस्य रूपं सौन्दर्यं दृष्ट्वा नेत्रयोः फलं साध्यं प्रापुः। लोचनयोरेतदेव फलं यत् तादृक् रूपं दृश्यते। किं कृत्वा? निजपतेरन्यस्मिन् पुरुषेऽवलोकननिवृत्तिव्रतवत्यो भूत्वाऽपि

तासां हि परपुरुषविलोकनप्रतिषेध एव प्रशस्यं वृत्तमस्ति। तथाऽप्याकस्मिकं भुवि तस्य प्रतिबिम्बगतं रूपं ताभिः सादरं दृष्टमिति कियानपि वृत्तभङ्गः सम्बभूवेत्यर्थः॥४३॥

विलोक्य तच्छायमतर्कि ता-[133.6]-भिः पतिं प्रति स्वं वसुधापि धत्ते।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥४४॥

ताभिर्महिषीभिस्तस्य प्रतिबिम्बं दृष्ट्वा वितर्कितम्। कथं सम्भावितं तदाह। भूमिरपि निजं पतिं भर्तारं प्रति किमेनं मदनं कामं धत्ते। कथम्? यथा वयं निजं पतिं प्रति मदनं दध्महे। ननु कामः किल गौरोऽयं तु श्यामस्तत् कथं तासां तत्र तद् वितर्क इत्याह। कीदृशम्? त्रिनयननयनज्वलनज्वाला श्यामलमिति ॥४४॥

भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन् मणिकुट्टिमेषु।
पुरं परस्य प्रविशन् वियोगी योगीव चित्रं स रराज राजा ॥४५॥

चित्रमाश्चर्यम्। स वियोगी विरही राजा योगीव वियोगरहित इव रराज। अथ च राजा सन् योगीवाध्यात्मविदिव रराज। राजधर्मे वर्तमानस्य योगिधर्मरहितस्य राज्ञो योगिधर्मो दृश्यमानश्चित्राय। तमेव योगिधर्ममाह। किं कुर्वन्नदृश्यो भवन्निन्द्रप्रसादाद् योगिनोऽपि योगशक्तेरदृश्यत्वम्। पुनः किं कुर्वन्? स्फटिकबद्धभूमिषु देहस्य व्यूहं भूयस्त्वं वितन्वन्। योग्यपि बहून् देहान् कुरुते। किं कृत्वेति रराजेत्याह। परस्यान्यस्य राज्ञः पुरं नगरं प्रविश्य। योग्यपि परस्य स्वव्यतिरिक्तस्य पुरं शरीरं प्रविशति। परस्य पुरं प्रविश्यादृश्यो भवन्निति वा योज्यम् ॥४५॥

रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम्।
तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् ॥४६॥

नाम प्रकाशे ताभिर्महिषीभिरस्य नलस्य रूपं सौन्दर्यं प्रतिच्छायिकया प्रतिमामात्रेणोपनीतं ढौकितं यदि कामं स्वैरमालोकि दृष्टं, तथापि तद्रूपं मूर्तिलक्षणं हारिद्रभङ्गाय हरिद्राच्छेदाय वितीर्णभङ्गं दत्तपराजयं नितान्तगौरं न दृष्टम्। तद्दर्शने हि तासां परपुरुषानवलोकनवृत्तभङ्गः सम्भवति। न तु प्रतिच्छायिकामात्रदर्शने। अथवा तद्रूपं नालोकि। तद्दर्शने हि तासामतीव दृशोः साफल्यं स्यात्। अथवा लोकानालोकयोर्विरोधिनोरेकत्रावस्थाद् विरोधः। हारिद्रभङ्गायेति भावानयने द्रव्यानयनमिति न्यायाद् भङ्गा हरिद्रा लभ्यते ॥४६॥

पुमानिवास्पर्शि यथा भ्रमत्त्या छाया यथा पुंस इव व्यलोकि।
ब्रुवन्निवातर्कि यथापि कश्चिदिति स्म स स्त्रैणगिरः शृणोति ॥४७॥
एवं स स्त्रीणां समूहस्य गिरः शृणोतिस्मेति निगदव्याख्यातमेव शेषम् ॥४७॥
अम्बां प्रणत्योपनता नताङ्गी नलेन भैमी पथि योगमाप।
स भ्रान्तभैमीषु न तां व्यविक्त सा तं च नादर्शददृश्यमेव ॥४८॥.
अम्बां मातरं नमस्कृत्योपस्थिता स्तनभरनमिताङ्गी भैमी मा-[१३४.७]-र्गे नैषधेन सार्धं सङ्गं लेभे। किं तु स नलो भ्रान्तासु भ्रमदृष्टासु भैमीषु मध्ये तां तात्त्विकीं न विवेद। सा च तं नलमदृश्यमेव नापश्यत्। अदृश्यो हि कथमिव दृश्यते। सा तं च नादृश्यतया ददर्श इति पाठः ॥४८॥
प्रसूप्रसादाधिगता प्रसूनमाला नलस्योद्भ्रमवीक्षितस्य।
क्षिप्तापि कण्ठाय तयोपकण्ठस्थितं तमालम्बत सत्यमेव ॥४९॥
प्रसूर्माता तस्याः प्रसादेन प्रीत्या प्रसादः प्रीतिदायो वाऽधिगता प्राप्ता, प्रसून-माला कुसुमस्रक् उद्भ्रमवीक्षितस्य मिथ्याज्ञानदृष्टस्यापि नलस्य कण्ठाय तया भैम्या क्षिप्ता न्यस्ता सती, तं नलमुपकण्ठस्थितं समीपवर्तिनं सत्यं तात्त्विकमे-वालम्बत शिश्रिये तस्य सत्यस्यैव कण्ठे सा पतितेत्यर्थः ॥४९॥.
स्रग्वासनादृष्टजनप्रसादः सत्येयमित्यद्भुतमाप भूपः।
क्षिप्तामदृश्यत्वमितां च भ्रान्ता मालोक्य तां विस्मयते स्म बाला ॥५०॥
वासनया ध्यानेन दृष्टो यो जनो दमयन्तीलक्षणस्तस्य प्रसादः प्रीतिदाय इयमेषा स्रग् माला सत्या तात्त्विकीति कृत्वा भूपोऽद्भुतमाप। क्षिप्तां तां मालां -लाम- अदृश्यभाव-मितां प्राप्तां दृष्ट्वा भैमी विसिस्मये ॥५०॥.
अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाध्युषितेऽपि देशे।
आलिङ्गितालीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते ॥५१॥.
तौ भैमीनलौ मिथः परस्परं सत्यमेव परिष्वजेते स्म। क्व? आलिङ्गितमलीकं भ्रान्तं यत् परस्परमन्योन्यं तस्यान्तर्मध्ये। किं कुर्वाणौ? अन्योन्येन साक्षादधिष्ठितेऽपि स्थाने-ऽन्योन्यं परस्परमन्यत्रवदीक्षमाणौ। यथाऽन्यस्मिन् प्रदेशेऽन्योन्यं भ्रान्तमनुभूतं तथा प्रत्यक्षतयाऽधिष्ठितेऽपि देशे मन्यमानावित्यर्थः ॥५१॥.

स्पर्शं तमस्याधिगतापि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीतस्तम्भो न धर्तुं सहसा शशाक ॥५२॥

भैमी तं तादृशस्य नलस्य स्पर्शमङ्गसङ्गसुखमधिगता प्राप्ताऽपि सती, पुनर्भ्रान्तिं भ्रमं मेने । केन? अदर्शनेन हेतुना । स नृपः पुनस्तां पश्यन्नप्युदीतजडीभावः सन् झटिति ग्रहीतुं नापारयत ॥५२॥

स्पर्शातिहर्षार्पितसत्यमत्या प्रवृत्य मिथ्याप्रतिलब्धबाधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ॥५३॥

तौ भूयः परस्परं सत्यमपि मार्गे संयोगं गच्छन्तौ सम्प्रत्ययं नापतुः । कीदृशौ? स्पर्शश्यशाथोऽतिशायी हर्षः प्रमोदस्तेनादृता स्वीकृता या सत्यस्य तात्त्विकस्य मतिर्बुद्धिस्तया प्रवृत्य, प्रवर्तनं कृत्वा, मिथ्याभ्रान्तिर्विलथैव प्रतिलब्धा, प्रतीवं प्राप्ता, बाधा विसंवादो यस्यां, तौ तथा ॥५३॥

सर्वत्र संवादमबाधमानौ रूपश्रियाति-[134.b]-थ्यकरं परं तौ ।
न शेकतुः केलिरसाद्विरन्तुमलीकमालोक्य परस्परं तु ॥५४॥

तु पुनस्तौ परस्परमलीकं भ्रान्तमप्यालोक्य केलिरसात् क्रीडारागाद् विरन्तुं निवर्तितुं न शेकतुर्न शक्नुतः स्म । किं कुर्वाणौ? [सर्वत्र] सर्वस्मिन् स्थाने संवादं सादृश्यमबाधमानौ, अनुभवन्तौ । कीदृशम्? परमद्वितीयमातिथ्यकरं पूजा व्यधायि । कया? रूपश्रिया सौन्दर्यसम्पदा । रूपाधिक्यं हि दृष्टं सत् परमप्रीतिजनकं सम्पद्यत एव । स्पर्शस्तु तत्त्वत एव न भ्रान्तौ ॥५४॥

परस्परस्पर्शरसोर्मिसेकात्तयोः क्षणं चेतसि विप्रलम्भः ।
स्नेहातिदानादिव दीपिकार्चिर्निमिष्य किञ्चिद् द्विगुणं दिदीपे ॥५५॥

अन्योन्याङ्गसङ्गसुखामृतसेचनात् तयोर्मनसि वर्तमानो विरहानलः क्षणमात्रं मन्दी--भूय आज्वल्यते स्म । किमिव । तैलातिपूरणात् प्रदीपज्वालेव ॥५५॥

वेश्माप सा धैर्यवियोगयोगाद्धु बोधं च मोहं च मुहुर्दधाना ।
पुनः पुनस्तत्र पुरः स पश्यन् बभ्राम तां सुभ्रुवमुद्भ्रमेण ॥५६॥

धैर्यं च वियोगश्च तयोर्योगात् संबन्धाद्यथासङ्ख्यं साम्येन चैतन्यं च वैचित्र्यं च बिभ्रती सती, भैमी हर्म्यं गता । स नलः पुनस्तत्र स्थाने तां मृगाक्षीं वीक्ष्यमाणः सन्, प्रबलमोहवशाद्धु भूयो भ्रान्तः ॥५६॥

पद्भ्यां नृपः सञ्चरमाण एष चिरं परिभ्रम्य कथंकथंचित् ।
विदर्भराजप्रभवानिवासं प्रासादमभ्रंकषमाससाद ॥५७॥

एष नृपः पद्भ्यां सञ्चरमाणश्चरणचारी सन्, बहुकालमितस्ततो भ्रमणं कृत्वा सुमहता प्रयत्नेन भैमीवासभूतं गगनचुम्बि सौधं प्राप । निवसन्त्यस्मिन्निति निवासः । विदर्भराजप्रभवा दमयन्ती तस्या निवासः । सञ्चरमाण इति "समस्तृतीयायुक्तात्" [ ] इत्यात्मनेपदम् । नृपः पद्भ्यां सञ्चरमाणश्चिरं परिभ्रम्यावश्यं श्राम्यति ॥५७॥

सखीजनानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्तीम् ।
विलोकयामास सभां स भैम्यास्तस्य प्रतोलीमणिवेदिकायाम् ॥५८॥

तस्य प्रासादस्य प्रतोली समुन्नतविशालं द्वारं तत्र मणीनां स्फाटिकोपलानां या वेदिका वितर्दिका तस्यां स नलो दमयन्त्याः समितिमपश्यत् । किं कुर्वतीं ? । आली-समूहस्य सरागैर्विभ्रमैः कृत्वा अन्तःपुरशङ्कां जनयन्तीम् । आङ्पूर्वो वहिः करोत्यर्थः ॥५८॥

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत यत्र काचिन्नलेन बाला कलमालपन्ती ॥५९॥

सैव सभा वर्ण्यते । यत्र सभायां काऽपि युवती मधुरमाभाषमाणा सती, हृदि, नलेनैवं स्तुता । कथमित्याह । अस्याः रेखात्रयो-[135 a]-पलक्षितः कण्ठः किं तिस्रो जिताः कथयति । कास्तिस्र इत्याह । पिकवेणुवीणाः कोकिलवंशवल्लकीः । द्वन्द्वे तु पर-वल्लिङ्गमिति वीणाऽपेक्षया तिस्र इति स्त्रीत्वम् । तिस्र इत्यत्र विधेयं, वीणा इति त्वनूद्यम् । सामान्यविवक्षायां त्रीणीति नपुंसकत्वं स्यात् । आलपन्ती गेयं गातुमिच्छन्ती वा । आलापो हि गीतारम्भक्रमोऽपि ॥५९॥

एतं नलं तं दमयन्ति ! पश्य त्यजार्त्तिमित्यालिकुलप्रबोधान् ।
श्रुत्वा स नारीकरवर्त्तिसारीमुखात् स्वमाशङ्कत यत्र दृष्टम् ॥६०॥

इत्येवंरूपात् सखीसमूहस्य प्रबोधवचनप्रपञ्चान् नार्याः करे वर्तमाना या सारी शुकपत्नी तस्या मुखादाकर्ण्यात्मानं प्रत्यक्षीकृतं समभावयत् । नूनमहमनया सारिकया दृष्ट इति । तेन ज्ञातमित्यर्थः । इति कथं तदाह । हे दमयन्ति ! तं निजप्रेमपात्रं नलमेतं प्रत्यक्षं वीक्षस्व । अर्त्तिं पीडां जहिहि । सख्यो हि पटे, भित्तौ, भूमौ वा लिखितं नलमेतमिति निर्देशपुरःसरं तस्यै दर्शयन्त्यः प्रबोधनवचांस्युपन्यसन्ति । तानि च यथाश्रुतान्यधीत्य [1] सारिकाऽवदति ॥६०॥

1. B. शारिकामुपवदति.

यत्रैकयालीकनलीकृतालीकण्ठे मृषाभीमभवीभवन्त्या ।
तद्दृक्पथे दौहृदिकोपनीता शालीनमाधायि मधूकमाला ॥६१॥

यस्यां सभायामेकया कयाचिन्नार्या मृषा मिथ्या भीमभवया भीमभवया भवन्त्या भीमभवीभवन्त्या । शालीनमधृष्टं यथास्यादेवं दौहृदिकोपनीता मधूककुसुमानां स्रक् न्यधायि निहिता । क्व ? । अलीकनलीकृतालीकण्ठे । क्व ? तस्य नलस्य दृशोः पन्था-स्तद्दृक्पथस्तस्मिन् । नले पश्यति सतीत्यर्थः । अनलीकनलोऽलीकनलः कृता, अलीकनलीकृता सा चासावाली च तस्याः कण्ठस्तस्मिन् । दोहदमशोकबकुलादीनां शंसति दौहृदिकस्तेनोपनीता ढौकनिकीकृता । अशोकबकुलादीनां दोहदो हि तरुण-रमणीसम्पाद्यः । एका सखी मिथ्या नलः सम्पन्ना । अन्या च मिथ्या दमयन्ती भूता । तयोस्तत्र नले पश्यति, स्वयंवरो यत्र वृत्त इत्यर्थः ॥६१॥

चन्द्राभमाभ्रं तिलकं दधाना तद्वन्निजास्येन्दुकृतानुबिम्बम् ।
सखीमुखे चन्द्रसमे ससर्ज चन्द्रानवस्थामिव कापि यत्र ॥६२॥

यत्र संसदि कापि बाला चन्द्रसमे, विधुनिभे सख्या मुखे अभ्रकस्येदमाभ्रं तिलकं विशेषकं दधाना विन्यस्यन्ती सती, चन्द्रानवस्थामिन्दुबाहुल्यमिव ससर्ज । कीदृशं तिलकम् ? तद्वन्निजास्येन्दुकृतानुबिम्बम् । तच्चन्द्राभमाभ्रं तिलकं विद्यते यस्य स तद्वान् । निजास्यमेवेन्दुर्निजास्येन्दुः तद्वांश्चासौ निजास्येन्दुश्च तद्वन्नि-[135.b]-जास्येन्दुस्तेन कृतोऽनुबिम्बः प्रतिफलनं यत्र तत् तथा । एवं चन्द्रचतुष्टयं भवति । चन्द्रश्च व्यवस्थित एक एव । "अभ्रकं गिरिजामले" । अत्र तु कप्रत्ययेन विनैव प्रयोगः ॥६२॥

दलोदरे काञ्चनकेतकस्य क्षणान्मषीभावुकवर्णलेखम् ।
तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखनीभिः ॥६३॥

यत्र संसदि सुवर्णकेतक्याः पत्रस्य मध्ये । क्षणमात्रेण मषीभवनशीला वर्णानामक्षराणां लेखा यत्र तं तथाभूतं स्वमात्मीयमनङ्गप्रधानं लेखं भूर्जम् । तस्यैव नलस्य कृते नखा एव लेखन्यस्ताभिर्भैमी लिलेख लिख्यतेऽस्मिन्निति लेखः । नखलेखनीभिरिति नखानां म्रदीयस्त्वाच्चातुर्याद् वा बहुत्वनिर्देशः । एकं हि म्रदीयस्तलिनं च नश्वरं लिखनेन खिद्यते ॥६३॥

विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृताऽपि यत्र ।
अशाकि लीलाकमलं न पाणिरपारि कर्णोत्पलमक्षि नैव ॥६४॥

यत्र संसदि लिपिषु विषये प्रसिद्धयाऽपि वयस्यया भैम्या लीलाकमलं विलेखितुमशाकि। न [1]भैम्याः सख्या। भैम्याः लीलाकमलमालेखितम्। पाणिकमलं नैवालेखितमिति भावः। पाणिः करः। कर्णोत्पलं च लेखितुमपारि पारि, तं नैव कथञ्चिदक्षि। [2]पुनः भैम्याः कर्णोत्पलं, कर्णे स्थितं कमलमालेखितम्। नैवाक्षिः। चक्षुः कथञ्चिदपि नालेखितेति भावः। पाणिचक्षुषोर्भावानां दुर्लक्ष्यत्वात्, तद्विलेखने शक्तेरभावः। विलिखनं चित्रकरणम्। लिपिरत्र भैम्याः। अत्राक्षेपव्यतिरेकयोरन्यतरस्य पर्यवसायः ॥६४॥

भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः।
गन्धर्ववध्वः स्वरमध्वरीणतत्कण्ठनालैकधुरीणवीणः ॥६५॥

यत्र सभायां गन्धर्ववध्वो गायन्त्यः साक्षात् कलिप्रियस्य नारदस्य प्रियशिष्यवर्ग एवागत्य भैमीमुप[3]वीणयति स्म। न हि तादृश्यो गायन्त्योऽन्याः सम्भवन्ति। कीदृशः स्वर एव मधु तेनारीणानि पूर्णानि तासां गन्धर्ववधूनां तस्यैव वा प्रियशिष्यवर्गस्य कण्ठनालानि तैः सह तेषां वा एकधुरीणा एकधुरावहा वीणा यस्येति यत्र गानसम्पत्तिसूचनम्। तत् शब्दोऽयं भैमीमेव वा स्पृशति। सजातीयसमूहो वर्गः प्रियश्चासौ शिष्यवर्गश्च। शिष्याः प्रायेण पुमांस एव। वर्गशब्दनिर्देशात् तु तन्मध्यपातिन्यः स्त्रियोऽपि। गन्धर्ववध्वोऽत्र मानव्य एव, न तु दिव्यस्त्रियः। स्वरसौष्ठवात् तु नारदशिष्यवर्गत्वरूपणम्। गन्धर्ववध्वोऽनूद्याः, प्रियशिष्यवर्गस्तु विधेयः। उभावेकधुरीणैकधुरावेकधुरावहे। अत्र त्वेकधुरीणत्वेन सादृश्यमुपचारात् ॥६५॥

नावा स्मरः किं हरभीतिगुप्तेः पयोधरे खेलति कुम्भ एव।
इत्यर्धचन्द्राभनखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ॥६६॥

अर्ध-[136.a]-चन्द्राभं नखाङ्कं चुम्बति(तः) इत्येवंशीलः(लौ) कुचौ यस्याः सा सखी वयस्या यत्र सखीभिरित्युक्ता। इति कथमित्याह। पयोधरे स्तने कुम्भ एव साक्षात्कलशे त्रिनयनभयगोपनात् हेतोः किं स्मरो नावा तरण्या कृत्वा खेलतीति। पयोधरो जलपूर्णोऽपि। कामस्य तत्राधिष्ठानादित्यमूहः ॥६६॥

स्मराशुगीभूय विदर्भसुभ्रूवक्षोजयोरक्षोभि खलु प्रसूनैः।
स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय ॥६७॥

---

1. B. om. भैम्याः ---- भावः. 2. B. om. पुनः ---- भावः. 3. B. वेणति.

बकुलादीनां कुसुमानां स्रक् सूच्या सम्प्रोय विरच्यते। तत्र कवेरन्यथाऽध्यारोपः। खलु नूनं कुसुमैः कामशररूपतां प्राप्य, विदर्भसुभ्रा दमयन्त्या वक्ष उरो यदक्षोभि क्षोभं नीतं, तदत्र सभायामेकनार्या, तेषु प्रसूनेषु विषये सूचेः शिखाग्रं निखाय व्यापार्याऽशोधि प्रतिकृतम्। किं कुर्वन्त्या। स्रजं मालां सृजन्त्या निर्मिमाणया। वैरशुद्धिः प्रतीकारः ॥६७॥

यत्रावदत्तामतिभीय भैमी त्यज त्यजेदं सखि! साहसिक्यम्।
त्वमेव कृत्वा मदनाय दत्से बाणान् प्रसूनानि गुणेन सज्जान् ॥६८॥

यत्र संसदि भैमी भृशं भयं प्राप्य, तां पुष्पस्रजं सृजन्तीं बालामवदत्। कथमवदत् तदाह। हे सखि! इदमेतत् साहसिक्यं साहसिकत्वं मुञ्च मुञ्च। ननु प्रसूनान्येव बाणान् गुणेन शिञ्जिन्या सज्जान् संहितान् कृत्वा प्रत्युत त्वमेव मदनाय दत्से समर्पयसि। तत्त्वतस्तु गुणः सूत्रमयोऽत्र कुसुमानि प्रकीर्णान्यपि समुद्दीपनानि स्मरस्य मालीकृतानि तु किं कथ्यन्ते ॥६८॥

आलिख्य सख्याः कुचपत्रभङ्गीमध्ये सुमध्या मकरीं करेण।
यत्रालपत्तामिदमालि! यानं जाने त्वदेकावलिनाकनद्याः ॥६९॥

यत्र काचन सुमध्या सख्याः कुचयोर्यानि पत्राणि तिलकविशेषास्तेषां भङ्गी विच्छित्तिस्तस्या मध्ये करेणैव न तु तूलिकया मकरीं जलजन्तुविशेषमालिख्य चित्रतां नीत्वा तामेव सखीमवदत्। किमवदत् तदाह। हे आलि! तवैकावलिर्मुक्तालतैव नाकनदी गङ्गा तस्या अहमिदं यानं वाहनं वेद्मि। गङ्गायाः किल मकरो यानम्। मुक्तावली च स्वच्छा कुचयोः सन्निहितैव वर्तते ॥६९॥

तामेव सा यत्र जगाद भूयः पयोधियादः कुचकुम्भयोस्ते।
सेयं स्थिता तावकहृच्छयाङ्कप्रियास्तु विस्तारयशःप्रशस्तिः ॥७०॥

तामेव सखीं सा सखी यत्र भूयो जगाद। किं पुनरुवाच तदाह। सेयं मकरी पयोधि-र्यादः समुद्रस्य जलजन्तुस्तव कुचयोः स्थिता सती सन्निधानात् तावकस्य त्वदीयस्य हृच्छयस्य मनसिजस्य योऽङ्कश्चिह्नं मकरस्तस्य प्रिया भार्या भवतु सङ्गच्छताम्। या किम्? या विस्तारयशःप्रशस्तिः। अर्थात् कुचयो-[136.b]-रेव विस्तारो वैपुल्यं तस्य यशः शुभा प्रसिद्धिस्तस्य प्रशस्तिर्वर्णना। न हि विपुलेतरयोः स्तनयोः सा यथेच्छं लिखितुं पार्यते। यस्मात् तत्र मकरी लिखिता, तस्मात् तौ विपुलौ किञ्च ययोः कुम्भयोः पयोधेः समुद्रस्य यादः स्थितं तावचश्यं पृथुलौ। न हि समुद्रयादो

महाप्रमाणतया प्रसिद्धमल्पप्रमाणयोः कुम्भयोर्माति । तत्र तस्य वर्तनादेव तयो-
-र्विस्तारो महानवगम्यते ॥७०॥

शारीं चरन्तीं सखि ! मारयैतामित्यक्षदाये कथिते कयापि ।
यत्र स्वघातभ्रमभीरुशारीकाकुत्थसाकूतहसः ससज्जे ॥७१॥

हे सखि ! एतां चरन्तीं, इतस्ततो गच्छन्तीं, शारीं दन्तकाष्ठादिमयीं मारय जहि। इत्येवं कयापि सख्या पाशिकक्रीडावसरेऽक्षदाये पाशकविन्यासे दशपञ्च चैवं विप्रभृति के कथिते समुद्दिष्टे सति, यत्र स्वघातभ्रमेण निजवधभ्रान्त्या भीरुर्भयशीला या शारी शुकपत्नी तस्याः काकुर्ध्वनिविशेषस्तत उत्थ उत्थानं यस्य स एवंभूतः साकूतः साभिप्रायो हसो हासः ससज्जे सज्जो जातः । सर्वा अपि साकूतं हसिता इत्यर्थः । सा हि जानाति स्म किलेयमाचरन्तीं कूरं भक्षयन्तीं मारयितुमाहेति । ससज्ज इत्यात्मनेपदं चिन्त्यम् । चुरादौ वा विकल्पेनन्त आत्मनेपदिषु । शृणाति जीवानिति शारी पक्षिणी । शृणन्ति ध्नन्त्येनामिति शारी दन्तकाष्ठादिमयी ॥७१॥

भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीन् ।
कृतप्रियादूत्यमहोपकारमरालमोहद्रढिमानमूहे ॥७२॥

भैम्याः समीपे वर्तमानस्य ताम्बूलसंबन्धिनो जाम्बूनदहंसस्य सुवर्णमरालस्य लक्ष्मीं श्रियं यत्र दृष्ट्वा । कृतः प्रियादूत्यमेव महानुपकारो येन स चासौ मरालो हंसस्तस्य मोहो भ्रान्तिस्तस्य द्रढिमानं स्थिरत्वमूहे, वहते स्म । नूनं स एवायं मम मित्रं हंस इति ज्ञातवानित्यर्थः । स हि सौवर्णो विदित एव ॥७२॥

तस्मिन्नियं सेति सखीसमाजे नलस्य सन्देहमथ व्युदस्यन् ।
अपृष्ट एव स्फुटमाचचक्षे स कोऽपि रूपातिशयः स्वयं ताम् ॥७३॥

अथ स कोऽप्यनिर्वचनीयः सौन्दर्यातिरेको नलस्य संशयं दूरं प्रक्षिपन्, अपृष्ट एव । इयं सा दमयन्तीति स्वयमात्मनैवाख्यत् । क्व ? तस्मिन् पूर्वोक्ते तस्या एव वयस्यानां वृन्दे कामनीयकातिरेकं तत्र तस्यामतीव समुदितमवलोक्य नूनमियं सा मत्प्रियेति तेन निष्टंकितमिति भावः ॥७३॥

भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम् ।
जातकिं मध्ये स्फुटमप्युदीर्तं तस्यानुबिम्बं मणिवेदिकायाम् ॥७४॥

भैम्या वि-[137.b]-नोदाय कौतुकसुखाय दिननिर्गमनाय प्रीत्या सखीभिर्भूमौ चित्रलिखितानां तस्याकृतीनां मूर्तीनां महाप्रकटमभ्युद्गतं तस्यानुबिम्बं स्फटिकचित्त-रिकायां न तर्कितम्। सादृश्याद् भेदानुपलब्धेः ॥७४॥

हुताशकीनाशजलेशदूतीर्निराकरिष्णोः कृतकाकुयाञ्चाः।
भैम्या वचोभिः स निजां तदाशां न्यवर्तयद्दूरमपि प्रयाताम् ॥७५॥

वह्नियमवरुणदूतीः कृत्वा काकुभिर्याञ्चायकाभिस्ता निराकरणशीलाया भैम्या वचनैर्दूरं गतामपि निजाशां दमयन्तीप्राप्तिस्पृहालक्षणां न्यवर्तयत्। कर्णौ पिधाय मैवं मैवमित्यादि दमयन्तीवचः श्रुत्वा स्वस्थोऽभूदित्यर्थः ॥७५॥

विज्ञप्तिमन्तः सभयः स भैम्याः मध्येसभं वासवशंभलीयाम्।
सम्भालयामास भृशं कृशाशस्तदालिवृन्दैरभिनन्द्यमानाम् ॥७६॥

स नलो वासवशंभलीयाम् इन्द्रकुट्टनीसम्बन्धिनीं भैम्यां विषये सभाया मध्ये विज्ञप्तिं विज्ञापनिकामन्तश्चेतसि सभयस्तथा भृशमत्यर्थं दुर्बलाशः सन्नशृणोत्। यतस्तस्याः सखीसमूहैरभिनन्द्यमानां श्लाघ्यमानाम्। साधु साधु, युक्तमेतदतीवेत्यादिभिर्वचनैः सम्भूय सखीभिः प्रशस्यमानामित्यर्थः। नूनमेता दुराशाः सख्य एनामत्र प्रवर्तयिष्य-न्तीति संशयिताश इत्यर्थः ॥७६॥

लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य।
इन्द्रस्य दूत्यां रचय प्रसादं विज्ञापयन्त्यामवधानदानैः ॥७७॥

तामेव विज्ञप्तिमाह। देवसंबन्धिनी लिपिरप्रचुरत्वाद् भूमौ न सुखवाच्येति हेतो-र्भवत्यै प्रहितसन्देशस्य दिवस्पतेर्दूत्यां मयि विज्ञापयन्त्यां विषयेऽवधानदानैश्चेतस एकाग्रतया प्रसादं वरोधर्मं सृज। अवधानदानमेव हि तत्र महान् प्रसादः। विज्ञापनं बुधैरुक्तं निजकार्यप्रबोधनम्। प्रसादस्तु वरोधर्मः। अवधानदानैरिति गौरवाधिक्याद् वा बहुवचनम्। अवधानदानैर्हेतुभूतैर्विज्ञापयन्त्यामिति वा व्याख्येयम् ॥७७॥

सलीलमालिङ्गनयोपपीड्य मनामयं पृच्छति वासवस्त्वाम्।
शेषस्त्वदाश्लेषकथापवित्रैस्तद्रोमभिः संदिदिशे भवत्यै ॥७८॥

सविलासमाश्लेषेणोपपीड्य शक्रस्त्वामारोग्यं पृच्छति। शेषः प्रेमरसलक्षणोऽर्थो भवदा-लिङ्गनकथनमात्रकण्टकितैस्तस्य तनूरुहैस्तुभ्यं संदिष्टः। न हि परमप्रेमरसपारवश्यादृते गाढाश्लेषकथनमात्रेण रोम्णां कण्टकीभावो भवेत् ॥७८॥

यः प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमापदागः।
स्वयंवरस्थान[।३७.६]-भुमस्तमस्य बधान कण्ठं वरणस्रजाशु ॥७९॥

यो मघोनः कण्ठो मनसा प्रयुज्यमानोऽपि भवद्याचननिमित्तं ह्रियं लज्जामेवागो-ऽपराधमाप लेभे। स्वयंवरस्थानस्थस्यास्य मघोनस्तं कण्ठमाशु शीघ्रं वरण-मालया सङ्गमय। कवेरुक्तिवैदग्धीयम् ॥७९॥

नैनं त्यज क्षीरधिमन्थनाद्यैरस्यानुजायोद्गमितामरैः श्रीः।
श्राम्यन्तु नोत्थापयितुं श्रियं त्वे असमै विमथ्येक्षुरसोदमन्याम् ॥८०॥

हे सुभगे! एनं इन्द्रं नैव त्यज, न अमरा अस्मै शक्रायान्यां श्रियमुद्गम-यितुमुत्थापयितुं न श्राम्यन्तु खेदमावहन्तु। किं कृत्वा? इक्षुरसोदं विमथ्य। ते क इत्याह। यैरमरैः क्षीरधिमन्थनात् दुग्धोदधिविलोडनेनास्यानुजाय कनीयसे भ्रात्रे श्रीरुद्गमिता। लक्ष्मीरुत्पादिता। त्वं हि साक्षाच्छ्रीरिव। परं धराधिपादुदिता। त्वं चेत् तं वरयसि तदस्य श्रीलाभतृष्णा पूर्यते। देवाश्च ज्येष्ठे तिष्ठत्यनुजाय क्षीरनीरनिधिमथनपुरःसरं श्रियमुत्पाद्य सापराधाः सन्ति। तैरवश्यमेतदर्थं कुतोऽपि विशिष्टा श्रीरुत्पादनीया तत्र चेक्षुरसोद एव घटते। सप्तसमुद्रेष्वेकः किलेक्षु-रसोदोऽस्ति। 'न अस्मै' इत्यत्र सन्धिदूषणशङ्का चेत्तर्हि सन्धिर्न कार्य एव। विवक्षितो हि सन्धिर्भवतीति ॥८०॥

लोकसृजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान्महेन्द्रः।
किं कर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्ष्या किमतः परापि ॥८१॥

भुवनमालायां द्यौर्महती श्रेयसी दिवि च पुनरादितेया देवा महान्तो न त्वन्ये देवयोनयः आदितेयेष्वपि महेन्द्रो महीयान् गरिष्ठ इति। सारास्योऽलङ्कारः। उक्तिप्रत्युक्तौ पौनरुक्त्यं न दोषोऽपि तु गुण एव। यदि सोऽप्येतादृशस्तव किंकर्तुमर्थी, किङ्करीभवितुमिच्छति परं रागात् प्रेमरसात् न त्वनुरोधान्तरेण। तर्ह्यतः परापि एतस्मादन्या काऽपि कक्ष्या प्रकोष्ठविशेषो जागर्ति द्योतते। प्रकोष्ठेषु हि यथा श्रेष्ठं श्रेष्ठं वस्तु ध्रियते। 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' ॥८१॥

पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः।
कुरु प्रसादं तदलंकुरुष्व स्वीकारकृद्भूलवलम्भनेन ॥८२॥

पदं शतेनाप ---------- श्रमेण ॥८२॥

इन्द्रो यत्पदं स्वाराज्यलक्षणं स्थानं शतेन मखैः शतसङ्ख्याकैर्यज्ञैराप लेभे, तस्मै तादृशाय महद्दुःखार्जिताय पदाय स इन्द्रस्ते तव याचनचाटुकारः प्रार्थनप्रियवाक्य-निष्ठो वर्तते। अतस्त्वं प्रसादं कुरु। तत्पदं भुङ्क्ष्व। केन? स्वीकारकृदेवमस्त्विति सूचकं, यद् भ्रुवो नटनं नर्तनं, स एव श्रमः खेदो यस्तेन। तेन हि तत्पदं मह-[134.ब]-ता क्लेशेनार्जितं त्वं तु श्रममात्रेणैव तदधितिष्ठ ॥८२॥

मन्दाकिनीनन्दयोर्विहारे देवे भवेद्देवरि माधवे च।

श्रेयः श्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि! भावयस्व ॥८३॥

ननु तत्र को विशेषस्तं दर्शयति। हे भाविनि! लीलावति! तच्छ्रेयः शर्म त्वं मनसा चिन्तय। तत्किमित्याह। यच्छ्रेयो भवेत् घटते। क्व? मन्दाकिनीनन्दनयोर्विहारे क्रीडने सति। वाऽथवा। माधवे विष्णौ देवरे सति। तथा श्रियां लक्ष्म्याम्। यातरि देवराज्ञ्यां सत्यां यच्छ्रेयो भवेदिति सर्वत्र सम्बन्धः इन्द्रे वृते सत्येतत् त्रयं सङ्गतमेव। पत्युर्भ्राता देवरः। भ्रातृवर्गस्य या जाया यातरस्ताः परस्परम्। यातात्र देवराज्ञी, माधवो हीन्द्रस्यानुजः। स तु विशेषतो देवो न त्वपरदेववज्जातिमात्रेण ॥८३॥

रज्यस्व राज्ये जगतामितीन्द्राद्याच्ञाप्रतिष्ठां लभसे त्वमेव।

लघूकृतस्त्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥८४॥

किञ्च हे सुन्दरि! जगतां भुवनानां राज्ये, आधिपत्ये रज्यस्व, रक्ता भव। मनः संयोजयेत्येवं याच्ञाप्रतिष्ठां प्रार्थनागौरवमिन्द्रात् त्वमेव लभसे, नान्या काचन कामिनी कमनीयाऽपि। ननु न किञ्चिदेतदित्याह। तस्य जगद्राज्यस्य प्राप्तये लाभाय बलिनाम्नो दानवेन्द्रस्य याचनेन भिक्षणेन लघूकृतस्त्वं दूरस्वीकृतात्मानं वामनं सन्तं वामाननामानं विष्णुमूर्तिभेदं (-दमा-) आमनन्ति, सम्प्रदायेन कथयन्ति पौराणिकाः। लघुस्तृणतूलयन्निःसारोऽप्यत्र। एतच्चाख्यानकं प्रसिद्धमेव ॥८४॥

यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते।

प्रसीद तानप्यनृणान्विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसन्ध्यम् ॥८५॥

हे सुभगे! यानेव देवानमरांस्त्वं त्रिकालं कालत्रये नमसि वन्दसे, तेषां कृतघ्नी-कृतिः कृतघ्नीकरणमौचिती योग्यता ते तव न भवति। ये देवास्त्वया कालत्रये नमस्क्रियन्ते, ते त्वयैव कृतघ्नाः क्रियन्त इति तव न युक्तमित्यर्थः। अतस्त्वं

तानपि देवानृणान् ऋणरहितान् विधातुं प्रसादं कुरु। किं करिष्यतः ? । सन्ध्यात्रये भवच्चरणयोः पतितुमिच्छतः। इन्द्रं हि त्रिकालं, ते नमन्ति । तत्पत्नीभूतां भवतीमपि तथैव नमन्ति । पुरा [1]यावतो वर्तमाना अनेन पुरा योगे भविष्यन्ती वाच्या नमिष्यन्तीत्यर्थः । पुरा ते तव निजभक्तया यदि तेन भक्तिमाचरेयुस्तदा कृतघ्नीभवेयुः । अनेन च संविधानकेन तत् सर्वमनुबद्धं स्यात् ।अकृतघ्नानां कृतघ्नानां कृतिः कृतघ्नीकृतिः॥८५॥

इत्युक्तवत्या निहितादरेण भैमीगृहीता मघवत्प्रसादः।

स्रक्पारिजातस्य नलाशां वासैरशेषामपुपूरदाशाम्॥८६॥

मघवत इन्द्रस्य प्रसादः साक्षात् प्रीतिदाय एव । पारिजातकुसुमानां स्र-[13४,६]-माला नलाशामृते नलस्याशां वर्जयित्वा, वासैः परिमलैः कृत्वा अशेषां समस्तामाशां प्राचीप्रभृति काममपुपूरत् पूरयति स्म । इति जात्याऽऽ्यैकवचनम् । नलस्य त्वाशामपूर्णां रिक्तां चकारेत्याशाशब्दश्लेषच्छलेन प्रयुक्तः । आशा तृष्णाऽपि चायतेत्याशाशब्दस्योभयार्थत्वात् । सा हि नलं कृशाशमसृजत् । विशेषणद्वारेण नलाशाभङ्गहेतुमाह । कीदृशी स्रक् ? । इति पूर्वोक्तमुक्तवत्या भाषितवत्या बहुविधमभिधायोपरतयाऽर्थाद् दूत्या निहिता बलादर्पिता सती, आदरेण यत्नेन भैमीगृहीता दमयन्त्या समुपात्ता । दमयन्त्या हीन्द्रस्य मान्यत्वादेव सा प्रयत्नेन प्रतिगृहीता न त्वनुरागवशात् तद्वचनस्वीकारेण वरणबुद्ध्या । नलस्य तु प्रेमपूर्वग्रहणभ्रमोऽभूत् ततोऽसौ निराशः ॥८६॥

आर्ये ! विचार्यालमिहेति कापि योग्यं सखि! स्यादिति काचनापि ।

ओंकार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काप्यवोचत् ॥८७॥

आर्ये । स्वामिनि! इहास्मिन्नर्थे विचार्य विचारं कृत्वाऽलं, नैवात्र विचारो युक्त इति कापि सखी तत्रावोचत् । हे सखि! योग्यं स्यात्, सदृशं भवेदेवं कृते सतीति काचनापि । अत्रार्थे मङ्गल्यं मङ्गलहितं वस्तु पदार्थ ओंकार एव । एवमस्त्वित्युत्तरमस्तु इति च काऽप्यवोचदिति दीपकम् । ओंकार एवोत्तरमित्यनूद्य मङ्गल्यं वस्तु विधेयम् । उत्तररूपमोङ्कार एव मङ्गल्यं वस्त्वत्रास्त्वित्यर्थः । ओंकारो हि मङ्गलरूपः तथा चोक्तम् ।ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । भित्त्वा गण्डौ [कण्ठं] विनिष्क्रान्तौ तेनेमौ मङ्गलावुभौ । ओमेवं परमं मते उत्तरमनन्तरं करणीयम् । मङ्गल्यं वस्तु स्वस्तिवाचनाय दूर्वारोचनादिकमोङ्कार एवास्त्विति वा व्याख्येयम् ॥८७॥

1. ङ. om. यावतो ------ पुरा ते.

अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परममस्ति शेषः।
इतीरिते भीमजया न दूतीमालिङ्गदालीश्च मुदामियत्ता ॥८८॥

भीमजया इतीरिते सति मुदां प्रीतीनामियत्ता इयत्परिमाणं दूतीं शक्रस्यालीश्च तस्या एव नालिङ्गत्। दूती सख्यश्चातीव तरां हृष्टा इत्यर्थः। इति कथमित्याह। अहं कदाचित् किं वो युष्माकमनाश्रवा अवचनकारिणी। अपि तु सर्वकालमहं भवतीनां वचनं करोमि। परं किं तु विशेषोऽवशिष्टो विशेषो वक्तुमस्ति। किमपि विशेषरूपमहं वक्ष्यामीत्यर्थः। वचने स्थित आश्रवः ॥८८॥

भैमीं च दूत्यं च न किञ्चिदापमिति स्वयं भावयतो नलस्य।
आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥८९॥

नलस्य हृदयारविन्दं यदि परं तस्या वदनचन्द्रदर्शना-[139.a]-देव भिन्नं स्फुरितं नाभूत्। चन्द्रदर्शने हि महोत्पलं न भिद्यते। अथ च तस्या इन्द्रविषयविरक्तिसूचकचेष्टा-विशिष्टमुखचन्द्रं दृष्ट्वा केवलं हृदयस्फुरणं न सम्प्राप्तवान्। किं कुर्वतः?। अहं भैमीं च दूत्यं च किञ्चिन्न प्राप्तवानस्मि। इत्येवं स्वयं भावयतो ध्यायतः सतः। भेदो विकासः। पक्षे विशीर्णता ॥८९॥

ईषत् स्मितक्षालितसृक्किभागा दृक्संज्ञया वारिततच्चदालिः।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयाम्बभूव ॥९०॥

भैमी तां दूतीं प्रतिवाक्यविषयतां निनाय। किं कृत्वा?। तयैव पारिजातकुसुममालया मनसा शिरसा च शक्रं नमस्कृत्य। तामेव मालां शिरसि प्रह्वे करसम्पुटेन निधाय मम नमस्कारोऽयं भगवते मघवते भवत्वित्युक्त्वा। कीदृशी?। मनाग् विहसितधौतोष्ठ-प्रान्तदेशा तथा दृष्टिसंकेतेनैव निषिद्धा सा सा पूर्वोक्तवचना सखी यया सा तथा। 'प्रान्तावोष्ठस्य सृक्किणी' [इत्यमरः]। उत्तरं करोत्युत्तरयति ॥९०॥

स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः।
मृषोत्तरं साक्षिणि हन्त नृणामज्ञातृविज्ञापि ममापि तस्मिन् ॥९१॥

हे दूति! मघोनः स्तुतौ विषये साहसिकतां त्यज। न हि तस्य गुणास्त्वादृशानां मतेर्विषयः। गुणानविज्ञाय च कथमिव स्तुतौ प्रवर्तते। यतस्तं मघवानं कियन्मनागपि वक्तुं भाषितुं यदि परं वेदः। श्रुतिरेव वेद जानाति, नान्यच्छास्त्रमपि। वेदे हि क्वापि क्वापि शक्रः स्तूयते। किं च ममापि तस्मिन् मघोनि नृणां देहवतां हन्त साक्षिणि उपद्रष्टरि विषये उत्तरं प्रतिवचनं मृषा वितथमेव। कीदृशम्? अज्ञातृविज्ञाप्यत अज्ञातृविज्ञापि।

स हि भगवानात्मस्वरूपतया सर्वेषां देहिनां शुभाशुभं पश्यन् हृदि तिष्ठत्येव । तस्मै चोत्तरं दीयमानमफलमेव । तद्धि तस्मै दीयते यो हृदयाभिप्रायं न वेद । हृच्छब्देनात्माधिष्ठानं देहान्तर्वर्ती स्थानविशेषो मन एव वा । मन एव किलात्माधिष्ठितं सर्वं पश्यति । प्रतिवाक्योत्तरे समे ' [ ] ॥९१॥

आज्ञां त्वदीयामनु कस्य नाम नकारपारुष्यमुपैति[1] जिह्वा ।
प्रह्वा तु तां मूर्ध्नि निधाय[2] मालां बालापराध्यामि विशेषवाग्भिः ॥९२॥

नाम भोः शक्र त्वत्संबन्धिनमादेशं प्रति कस्य जिह्वा निषेधकार्कश्यं श्रयति । कस्येत्यनेन युक्त्या लोकोक्तिसमाश्रयणेनात्मैव तथा विवक्षितः । अथवा कस्यान्यस्यापि मम तावन्नैव । न हि 'शक्राज्ञां न करोमि' इति कोऽपि वक्तुं शक्नोति । तदैव हि स नश्येत् । पुनस्तां त्वदर्पितां मालामेवाज्ञामुत्तमाङ्गे निधाय प्रह्वा नम्रास्मि । अतो विशेषवाग्भिरतिरिक्तगी-[139-b]-र्भिरहं बाला कुमारी खल्वपराध्यामि, सागस्का (?) भवामि । न इत्येतस्य करणं नकारः । यथा फूत्कारः । नञ् एव नकारः । तस्य निषेधाक्षरस्य करणमुच्चारणं वा ॥९२॥

तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ॥९३॥

इयं हरेरिन्द्रस्य कृपा । इमं मल्लक्षणं जनं तपस्येव तपोविषय एव नियुङ्क्ते व्यापारयति । मां तप एव कारयतीत्यर्थः । केन कृत्वा ? तपःफलत्वेन ~~...~~ तपःफलरूपतया । इयं हि शक्रस्य कृपा मम तपःफलरूपा । इदानीं मम तपसः फले निश्चयो जात इत्यर्थः । ननु प्रथमं किं भवती तपस्यनिश्चितेत्याह । हि यस्मादुपायं तपोयज्ञादिकं प्रति प्रवृत्तौ प्रवर्तने लगने सति उपेयस्य तपोयज्ञादिसाध्यस्य स्वर्गादेर्माधुर्यं[3] रामणीयकमधैर्यसर्जि संशयविधायि भवति । आगमे ह्येवमुपदिष्टमस्ति । तपोयज्ञादिभिः सुसाधितैः स्वर्गः प्राप्यते । तत्र च यौवनान्तं वयस्तेजोमयो देहः कामित[4]विषयदेहप्राप्तिरित्यादि । तत्र चाप्रत्यक्षत्वादनिश्चयः । इदानीं च त्रिजगत्पतिः साक्षान्मामेवमर्थयमानस्तपोयज्ञादिफलसद्भावे निश्चयं जनितवान् । एतद्धि महतस्तपसः फलं यत् साक्षात् पुलोमजाजानिरिन्द्र एवं मम दयते । यत्तप ईदृक् प्रत्यक्षं महत् फलं तदहं कथमपि क्वापि कदापि न त्यक्ष्यामीत्यर्थः ॥९३॥

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेहमंशागतं तु क्षितिभृत्तयेह ॥९४॥

---

1. B. -- मवैति, 2 B1, B. विधाय. 3. B1. om. रामणीयक---धैर्य. 4. B. om. -देह-

यस्मादेवं तस्माद् हेतोरहं तमेव हरिं शुश्रूषितास्मि शुश्रूषिष्ये सेविष्ये। किमर्थम्। मुदे प्रीतयेऽपि व्रतसम्पदे तपःसमृद्ध्येऽपि। किं तु तत्रार्थं विशेषस्याधिक्यस्य लेशो लवोऽस्ति। इह भूमौ क्षितिभृत्तया राजमूर्तितया अंशेनागतं कलयावतीर्णमहं देवदेहं मानुषवपुषं तं शुश्रूषितास्मि इति सम्बन्धः। नलरूपं तं संश्रयिष्य इत्यर्थः। राजा च दिक्पालकलाभिः किल संसृज्यते। दिक्पालेषु चेन्द्रः प्रधानम् ॥९७॥

अश्रौषमिन्द्रादरिणी गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः।

स्वं प्रागहं प्रादिषि नामराय किं नाम तस्मै मनसा नराय ॥९५॥

हे दूति! ते तव सतीव्रतातिप्रतिलोमतीव्रा गिरः। अहमिन्द्रादरिणी सत्यश्रौषं श्रुतवत्यस्मि। इन्द्रो भगवान्मान्य इति कारणात् तव कुट्टन्याः सतीव्रतभङ्गविधायोऽ तएवातितीक्ष्णा वाचो मया श्रुता, न तु तासामेव क्षोभेन। यतोऽहं [150.a] प्राक् पूर्वं तस्मै हरये नराय नरमूर्तये स्वमात्मानं मनसा चेतसा कृत्वा प्रादिषि प्रदत्तवत्यस्मि न तु नाम भो अमराय देवरूपाय। अमराय तस्मै प्रागहं स्वं न प्रादिषि। किं नाम किं तु नरायेति वान्वयः। राजा हि तदंशत्वात् साक्षादिन्द्र एव। अथ च रलयोरभेदात् नरायेति नलायेत्यर्थः। सतीव्रतस्यातिप्रतिलोमाः प्रतिकूला, अत एव तीव्राः दुःसहाः ॥९५॥

तस्मिन्विमृश्यैव वृते हृदैषा मैन्द्री दया मामनुतापिकाभूत्।

निर्यातुकामं भवसम्भवानां धीरं सुखानामवधीरणेव ॥९६॥

तस्मिन्नले हृदा मनसा विचार्यैव वृते स्वीकृते सति। इयमीदृशीन्द्रस्य दया मामनुतापिका, मम व्यथयित्री, नाभूत्। इन्द्रादीनप्यवगणय्य स मया मनसा वृतोऽस्तीत्यर्थः। केव कमित्याह। भवसम्भवानां संसरणोत्थानां पुत्रकलत्रादिहेतुभूतानां सुखानामवगणना निषेधनं वाऽवधीरणा यथा निर्याणं गन्तुमिच्छुं मनीषिणं नानुतापिका भवति। अनुतापः पश्चात्तापः ॥९६॥

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु।

तत्रास्मि पत्युर्वरिवस्ययेह शर्मोर्मिकिर्मीरितधर्मलिप्सुः ॥९७॥

वर्षेषु भूखण्डविशेषेषु मध्ये आर्यधुर्याः पौराणिकमुख्याः यद्भारताख्यं वर्षं स्तुवन्ति गृहस्थत्वमिवाश्रमेषु ब्रह्मचारीप्रभृतिषु। यथाऽऽश्रमेषु गृहस्थः प्रधानं तथा वर्षेषु यद् भारतं वर्षं प्रधानमित्यर्थः। तत्र भारतवर्षे पत्युर्वरिवस्यया शुश्रूषया कृत्वा

1. Bh. प्रवत्. 2. B. om. सुखानां --- ---वा.

शर्मोर्मिकिर्मीरितं सुखामृतलहरीकरम्बितं धर्मं सुकृतं लिप्सुर्लब्धुमिच्छुरस्मि वर्तेऽ-
-हमिति गम्यम्। भारतक्षेत्रपतेर्नलनाम्नश्चक्रवर्तिनः संश्रयणेन हि परमशर्मविमिश्रस्य
धर्मस्य लब्धिः, शक्रसेवया तु केवलस्यैव शर्मणः। तत्र हि न धर्मार्जनम् ॥९७॥

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च।
शक्या मखेनापि मुदोऽमराणां कथं विहाय त्रयमेकमीहे ॥९८॥

किञ्च नाके तिष्ठतां केवलं सुखं भवति, न तु बहुविधा धर्मा भवन्ति। इह भूमौ
सतां तच्च शर्म भवति, ते च धर्मा भवन्ति, गौणमुख्यभावं विनैव। मखेन यज्ञैः
कृत्वा देवानामपि मुदः प्रीतयः शक्याः प्रार्थाः। इहेति सम्बन्धः। यज्ञैः कृत्वा
देवा। अप्यत्र प्रीणयितुं शक्यन्ते। अतस्त्रयं विहाय एकं कथमीहे वाञ्छामि ॥९८॥

साधोरपि स्वः खलु गामिताधो गमी स तु स्वर्गमितः प्रयाणे।
इत्यायतिं चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥९९॥

साधोः सु-[140.8]-कृतिनोऽपि पुंसः स्वर्गात् खलु निःसंशयमधोगामिता पतन-
-पुरःसरं भूम्यागमनम्। तु पुनः स साधुरितो भूलोकात् प्रयाणे प्रकृष्टगमने
स्वर्गं गमी, दिवं गमिष्यति। इत्येवमायतिमुत्तरकालं हृदि मनसि चिन्तयतः पुरुषस्य
द्वयोः स्वर्लोकभूलोकयोरुदर्क उत्तरं फलं किमु द्वे शर्करे सिकतासितानाम्न्यौ न
भवतः। काक्वा नकारो विधौ। अपि तु द्वे शर्करे। शर्करा वालुका खण्डविकारश्च।
स्वर्गाद्यवश्यं तत्प्रापकसुकृतक्षये पतनमियमेव चाधोगतिः। भूलोकात्तु सुकृतोप-
-चये स्वर्गतिः। पतनं शर्करा वालुका निन्द्यत्वात्। ऊर्ध्वगतिः शर्करा खण्डविकारः
प्रशस्यत्वात्। उत्तरकाल आयतिः। उदर्कः फलमुत्तरम्। प्रयाणमत्र मरणमेव ॥९९॥

प्रक्षीण एवायुषि कर्मकृष्टे नरान्न तिष्ठत्युपतिष्ठते यः।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ॥१००॥

कोऽधीरो विद्वानपथ्यकल्पमपथ्यसदृशं नाकं बुभुक्षते भोक्तुमिच्छति। यतः
कीदृशम्? आपातसुखे प्रवेशकालनिर्वृतौ -नावु- उन्मुखमुत्कण्ठितम्। तं कमित्याह। यो नाक
आयुषि जीवितकाले प्रकर्षेण क्षीणे शीर्ण एव सति नरानुपतिष्ठत उपनमति। न
तिष्ठति वर्तमाने। कुतः सर्वथा त्रुटित आयुषीत्याह। कर्मणः कृष्टेः कर्षणात्।
अन्यदपि रज्ज्वादिवस्तु कर्षणात् त्रुट्यति। कर्मकृतमरणानन्तरमेव पुरुषैः स्वर्गः प्राप्यते।
न जीवद्भिः। यथाऽपथ्यमनवसरदत्तं दध्योदनाद्यापातसुखोन्मुखं भोजनकालशर्मोद्यतं
कोऽधीरः कातरो नूतनज्वराक्रान्तो भोक्तुमिच्छति। अपि तु न कोऽपि।

यदपथ्यं कर्मवशात् जीवितकालेऽल्पावशिष्टे एव नरानुपतिष्ठति, न तु तिष्ठत्यक्षीणे
मरणकाल एव ह्यपथ्यमुपतिष्ठते। पथि हितं पथ्यं मोदकादि। ततोऽन्यदपथ्यम्।
तत्सदृशमन्यदप्यपथ्यमित्युच्यते। ईषदपरिसमाप्तमपथ्यमपथ्यकल्पम्॥१००॥

इतीन्द्रदूत्यौ प्रतिवाचमर्धे प्रत्यूह्य सैषाभिदधे वयस्याः।
किञ्चिद् विवक्षोल्लसदोष्ठलक्ष्मीजितापनिद्रदलपङ्कजास्याः॥१०१॥

सैषा दमयन्तीति पूर्वोक्तप्रकारेणेन्द्रदूत्यां विषयेऽर्धे मध्ये वक्तव्यापरिसमाप्ता-
देव प्रतिवाचं प्रत्युत्तरं प्रत्यूह्य प्रत्यूहं कृत्वा वयस्याः सखीरभिदधे। कीदृशीः?
किंचिन्मनाक् या विवक्षा वक्तुमिच्छा तया कृत्वोल्लसन्ती स्फुरन्ती या, ओष्ठयो-
र्लक्ष्मीरधरयोः श्रीस्तया कृत्वा जितानि तिरस्कृतानि, [141-a] अपनिद्रदलान्यु-
न्मिलत्पत्राणि पङ्कजानि यैरेवंभूतानि आस्यानि मुखानि यासां तास्तथा। वयस्याः
पङ्कजास्या इति दूरस्था परमैत्री। प्रत्यूहं करोति प्रत्यूहयति। विघ्नोऽन्तरायः प्रत्यूहः॥१०१॥

अनादिधाविश्वपरम्पराया हेतुस्रजः स्रोतसि वेश्वरे वा।
आयत्तधीरेष जनस्तदार्याः! किमीदृशः पर्यनुयुज्यकार्यः॥१०२॥

हे सख्यः! एष मल्लक्षणो जन आयत्तधीरधीनबुद्धिः। क्व? हेतुस्रजः कारण-
मालायाः। स्रोतसि प्रवाहे। वेश्वरे वा भगवति, कर्तरि पुरुषे। कस्या हेतुस्रज इत्याह।
अनादिधा, अनेकप्रकारा या विश्वस्य जगतः परम्परा नैरन्तर्यम्, तस्याः। विश्वशब्देनात्र
विश्वस्थिता लोकास्तेषां परम्परा जन्ममरणलक्षणाऽनादिप्रकारा। लोका हि परम्परायाः
समुत्पद्यन्ते, यथोत्पत्ति च कर्माणि कुर्वन्ति। कर्मवशवर्तितया वेश्वरवशवर्तितया
वाऽहमेवं व्यवहरामि। तत् तस्मात् हे आर्याः! बहुश्रुता ईदृशः पराधीनो जनः पर्य-
नुयुज्य उपालभ्य किं कार्यः, किं कर्तव्यः, कारयितव्यो वा। कर्माधीनं वा जग-
दीश्वराधीनं वा। तथा चोक्तम्।—

'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि,
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्'॥१॥ [ ]

तथा- 'ईश्वरप्रेरितो गच्छेत् दुःखं वा यदि वा सुखम्'। अन्यदपि तृणकाष्ठादिस्रोतसि
पतितं सत् तदधीनं चेष्टितं भवति। आर्या इत्युल्लुण्ठनायाम्। अनादिधेति बहुधावद्
बहुत्वविवक्षायाम्। पर्यनुयोगो भवेदुपालम्भः॥१०२॥

नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः।
अचेतना सा च न वाचमर्हेद्वक्ता तु वक्राश्रमकर्म भुङ्क्ते॥१०३॥

केचिद्दैवाधीनं जगदाहुस्तन्मतमाश्रित्याह। सर्वकालमशेषे लोके नियत्या विधिना परवति पराधीने सति, कः प्राणी संविदानोऽपि जानन्नप्यनुयोगयोग्य उपालम्भार्हो भवति। अपि तु न कोऽपि। त्वं जानन्नपि किमेवं व्यवहरसीति। कोऽप्युपालब्धुं न योग्य इत्यर्थः। तस्य हि नियतिस्तत्र तत्र प्रयोक्त्री। सा च नियतिरचेतना चेतनशून्या। अतो वाच्यं नार्हति। हे नियते! त्वं किमेवं कारयसीति सा नोपालम्भयोग्या। सचेतन एव ह्युपालम्भनार्हः। वक्ता तु पुरुषः। वचनस्य यः श्रमस्तस्य कर्म दुःखलक्षणं भुङ्क्तेऽनुभवति। मुखं क्लेशयतीति यावत्। अर्थात् [illegible] नियत्यधीनं, तां च नियतिमुपालभमाना इत्यर्थः। संविदान इति समो गम्यृच्छिप्रच्छीत्यात्मनेपदम्। तस्मिंश्च सत्यकर्मकत्वम् ॥१०३॥

क्रमे-[141.6]-लकं निन्दति कोमलेच्छुः क्रमेलकः कण्टकलम्पटस्तम्।
प्रीतौ तयोरिष्टभुजोः समायां मध्यस्थता नैकतरोपहासः ॥१०४॥

किञ्च कोमलेच्छुर्दूर्वादिलोलुपोऽश्वादिः क्रमेलकमुष्ट्रं निन्दति। कण्टकलम्पटो बबूलकिशलयादिलोलुपः क्रमेलकस्तं कोमलेच्छुं निन्दति। तयोर्द्वयोः प्रीतौ समायां सत्यां विज्ञैर्मध्यस्थता कार्या औदासीन्यमवलम्बनीयम्। न एकतरस्य पूर्वस्य परस्य वोपहासो दूषणोद्भावनं कार्यम्। दूर्वाभक्षणेनाश्वस्य या प्रीतिरुष्ट्रस्य, सा कण्टकभक्षणेन। यथा कथञ्चित् प्रीतिरेव च साध्या। एतेन भिन्नरुचिर्लोक इति प्रदर्शितम्। मह्यमुष्ट्राय कण्टक इव नल एव रोचते, न त्वश्वाय कोमलयवस इव दिवस्पतिरिति भावः। उक्तिप्रत्युक्तौ पौनरुक्त्यं न दोषः। पर्यायोक्तेरेवायं भेदः ॥१०४॥

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति।
न लोकमालोकयथापवर्गात् त्रिवर्गमर्वाञ्चममुञ्चमानम् ॥१०५॥

किञ्च हे सख्यः! हरेर्गुणा हरन्तोऽपि प्रलोभयन्तोऽपि मे मह्यं रोचमानं स्वदमानं नरं मानुषम्। अथ च रलयोरैक्यान् नलं न परिहारयन्ति, न त्याजयन्ति। ननु कथमेवमित्याह। यूयं लोकं जनं नालोकयथ, न वीक्षध्वे। किं कुर्वाणम्? अपवर्गान्मोक्षादर्वाञ्चमर्वाग्वर्तिनमपि त्रिवर्गं धर्मार्थकामलक्षणममुञ्चमानमत्यजन्तं वस्तूपमेयम्। लोको यथा त्रिवर्गे सक्तो नापवर्गे तथाऽहं नले सक्ता न त्वाखण्डले। मे मह्यमित्यत्र रुचिक्रियापेक्षया सम्प्रदानत्वं विवक्षितं, न तु हरणक्रियायाः कर्मत्वं परिहारिक्रियाया वा प्रयोज्यकर्तृत्वम् ॥१०५॥

आकीरमाकैटभवैरि तुल्यः स्वाभीष्टलाभात्कृतकृत्यभावः।
भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥१०६॥

आकीरं कीरं मर्यादीकृत्य, आकैटभवैरि कैटभवैरिणं मर्यादीकृत्य, स्वाभीष्ट-लाभान्निजरुचितप्राप्तेः कृतकृत्यभावस्तुल्यः कृतकार्यता समा। कीरादधः प्राणी नास्ति। विष्णोरुपरिष्टात् च। यथा रुचितवस्तुलाभेन कीरः स्वात्मानं कृतकृत्य-भावं मन्यते, तथा विष्णुर्निजरुचितलाभेन। अर्थमर्थं प्रत्येकस्मिन्नर्थे भिन्न-स्पृहाणां पृथक्कामानां द्विष्टत्वमनिष्टत्वमिष्टत्वमप्यपव्यवस्थमनियतम्। न हि यदेकस्मै न रोचते तदन्यस्मा अपि न रोचते। यदेकस्मै रोचते, तदन्यस्मा अपि रोचते। तस्मान्मह्यं नलो रोचते, न ह-[142.a]-रिः। अन्येभ्यो हरी रोचते, न नलः ॥१०६॥

अग्रागजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात्प्रतिबन्धुमर्हः।
जोषं जनः कार्यविदस्तु वस्तु पृच्छया निजेच्छा पदवी मुदस्तु ॥१०७॥

अग्रे अग्रे, पुरः पुरो, जाग्रज्जलपूर्णो निभृतो गूढ आपदि विपदि यान्धुः कूपो यस्य स, एवंविधो बन्धुः स्वजनो यदि चेत्, प्रतिबन्धुं वारयितुमर्हः स्यात्। यद्ययमर्थो युक्तः स्यात् तर्हि कार्यवित् कर्तव्यकुशलो जनो जोषमस्तु, मौनीभवतु। तु पुनर्मुदः पदवी प्रीतेः पन्थानं निजेच्छा स्वकीया रुचिः पृच्छया पृष्ट्या। पूर्वं मनसा कृतं वृतं नलमनादृत्येन्द्रवरणमनिष्टशतहेतुत्वादभग्नजलपूर्ण-गूढकूपपतनमेव। मम पतिव्रतभङ्गप्रसङ्गात्। एवंभूताऽहं यदि वर्णयितुं योग्या, तर्हि यूयं सर्वास्तूष्णीं तिष्ठत। यथा मे रुचिस्तथाऽहं व्यवहरिष्यामीति भावः ॥१०७॥

इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलौल्यमौलिम् ॥१०८॥

एवं विपरीतवचनधियं वयस्यानां वैदुष्यशक्त्या समुत्पुंस्य बाला मुग्धाऽपि सती समाकर्णितगुरुसुभाषितामप्याश्चर्यधुतशिरसं शम्भलीं बभाण। बालाया ईदृशं पाण्डित्यमिति चित्रचित्रित (चित्रि-) मनोवृत्तित्वाद् दूत्याः शिरोधूननम् ॥१०८॥

परेतभर्तुर्मनसेव दूतीं नभस्वतेवानिलसख्यभाजः।
निपीतसेवाम्बुपतेस्तदाशु स्थिरास्थमायातवतीं निरास्थम् ॥१०९॥

भूयोऽर्थमेनं यदि मां त्वमात्थ तदा पदाद्यालभसे मघोनः।
सतीव्रतैस्तीव्रमिमं तु मन्तुमन्तर्वरं वज्रिणि मार्जितास्मि ॥११०॥

[1]काव्यद्वयस्य टीका। संदानितकमिदम्। [2]बद्धो निगडितोनद्धः कीलितो यन्त्रितः
सितः। संदानितः संयतश्च एते संदानितार्थाः। संदानितकं काव्यद्वयेन बद्धं इति
भावः। हे दूति! अहं निरास्थं निरक्षिपवत्यस्मि। काम्? दूतीम्। कस्य? परेत-
-भर्तुर्यमस्य। किं कृतवतीम्। आशु शीघ्रमायातवतीमागताम्। कथम्? स्थिरास्थं
दृढादरं यथा भवति। [3]उत्प्रेक्षते। मनसा चेतसेवायातवतीम्। परेतभर्तुर्हि बह्वी
मनःसामग्री, तेन तस्या एकं मनः समर्पितम्। [4]तेन वाऽऽयातवतीमिति शीघ्रा-
-गमनादित्थमूहः। किञ्च। अनिलसखस्य भाग्नो वह्नेर्दूतीं नभस्वता वायुनेवा-
-यातवतीम्। वायुर्वह्नेरधीनस्तेन तस्यास्त्वरितगमनाय वायुर्दत्तः। अम्बुपते-
-र्वरुणस्य दूतीं तदा तस्मिन्नवसरे आशु शीघ्रमायातवतीं निरास्थमिति सर्वत्र
संबन्धः। [5]उत्प्रेक्षते। त्रिस्रोतसा त्रिपथगयेव। जलेश्वरस्य हि त्रिपथगावशवर्तिनी
सा तेन तस्या दत्ता। सा च नभस आशु भुवि पतन्ती प्रसिद्धैव। [6]अथवाऽविमृश्य-
-कारित्वादुत्कण्ठमानिदं नामत्रयमिदं साभिप्रायम्। परेतभर्तृत्वेन निश्चेतनत्वं
वायुसखत्वेन वातूलत्वमम्बुपतिवाच्ये-[142.6]-न जलेशशब्देन जाड्यं च
व्यज्यते। पुनरेनमेवंविधमर्थं यदि मां त्वं ब्रविषि, तदा मघोनः पदावालभसे।
सस्नेहवचनं स्पृशसि। तदा शक्रचरणयोराज्ञेत्यर्थः। पुनरिमं मन्तुमपराधं वज्रिणि
कुलिशपाणावन्तश्चेतसि वर्तमानं वसन्तं साधु मार्जितास्मि व्यपनेष्यामि।
कैः कृत्वा? सतीव्रतैः। मन्तुं तीव्रं विनाशकम्। सतीव्रततोषितः प्रकुपितोऽपि
वज्री प्रतिप्रसादं करिष्यत्येव मयि। वज्रिणीति साभिप्रायम्। पदावित्ति पदशब्दः।
आलम्भोऽत्र वाचनिकच्छेदः शपथरूपः। निरास्थमित्यसु क्षेपणे। अथ तन्याः
परस्मैपदस्योत्तमपुरुषैकवचनं पुषादित्वादङ्। अस्यतेस्थोऽन्तः। वाक्यार्थद्वयस्यै-
-कसंबन्धात् संदानितकम् ॥१०९॥ ११०॥

इत्थं पुनर्यागवकाशनाशान्महेन्द्रदूत्यामपयातवत्याम्।
विवेश लोलं हृदयं नलस्य जीवः पुनः क्षीबमिव प्रबोधः ॥१११॥

1. ß. om. काव्य ---टीका। 2. ß. om. बद्धो ------इति भावः। 3. ß. उत्प्रेक्ष्यते-
4. B1. तेनेवायात --- 5. ß. उत्प्रेक्ष्यते. 6. अथ चाविमृश्य-

एवं भूयो वचनावसराभावात् मघवतो दूत्यामपगतायां सत्यां नलस्यास्थिरं हृदयं जीवः प्रविष्टः। यथा मत्तं नरं चैतन्यं प्रविशति।[1] मया पूर्वं मयो (तिस्रो) दूत्यो निरासिताः। त्वां कथयामि सावधानतया शृणु यदि त्वमेवंविधमिन्द्रवरणरूपमर्थं मां ब्रवीषि, तर्हि मघोनः महेन्द्रस्य पदौ आलभसे। इन्द्रचरणयोराश्लेत्यर्थः। [2]हवई बोलइतुं इन्द्रः। मत्ते शौण्डोत्कटक्षीबाः [इत्यमरः]। क्षीबोऽपि लोलो भवति। दमयन्त्यामिन्द्रानुरागजननवचनश्रवणाद्धि स निश्चैतन्य इवाभवत्। इदानीं तदवाप्ति-प्रत्याशावशात् पुनश्चैतन्यमवापेत्यर्थः ॥१११॥

श्रवणपुटयुगेन स्वेन साधूपनीतं दिगधिपकृपयाप्ताद्दीदृशः संविधानात्।
अलभत मधु बालारागवागुत्थमित्थं निषधजनपदेन्दुः पातुमानन्दसान्द्रः ॥११२॥

निषधजनपदेन्दुर्नलः मुग्धाप्रेमवचनजं क्षौद्रं पातुमुपयोक्तुं लेभे। अत एव हर्ष-निर्भरः। कीदृशम्? एवंरूपाद् दिगीशदयाप्ताल्लब्धात् संविधानाद् रचनाविशेषान्नि-ष्प्रेन कर्णपुटद्वयेन सम्यगुपहृतम्। यदि हि दिगीशदयाविहितमीदृशं संविधानं न भवेत्, तदा तादृशि पीयूषरसायनानि दमयन्तीवचनानि निजश्रवणाभ्यां कथं शृणुयात्। अन्यदपि मधु पर्णपुटयुगेनापि कस्मैचित् कस्मादपि संयोगविशेषात् सम्यगुपनीयते। परं प्रेमामृतं तद् यत् स्वात्मनैवानुभूयते ॥११२॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
षष्ठः खण्डनखण्डतोऽपि सहजात्क्षोदक्षमे तन्महा-
-काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥११३॥

खण्डनाख्यात् खण्डात् ग्रन्थविशेषात् सहजात् सहोत्पन्नादेककर्तृकत्वात् क्षोदक्षमे विचारविमर्दसहे। खण्डनखण्डाख्यो हि ग्रन्थः श्रीहर्षविनिर्मितोऽतीव क्षोदक्ष-[143.a]मः। इदं तु ततोऽप्यतितरां क्षोदक्षममित्यर्थः। सहजात् प्रकृतित एव वा। खण्डमेव खण्डमिक्षु-रसविकृतिरिति वेति शुभम् ॥११३॥

शाण्डिल्यनाममुनिवंशकरीरकस्य, श्रीधीरधीरतनयस्य गदाधरस्य।
कृतौ सुधामधुनि नैषधटीकिकायां, सर्गोऽत्र षष्ठ इति सम्प्रति पूर्यते स्म ॥११४॥
[3] इति श्रीनैषधकाव्ये गादाधरीटीकायां षष्ठः सर्गः। श्रीः। शुभं भवतु ॥

1. 8·cm. मया ---- क्षीबाः। 2. 31. हवई --- इन्द्रः। 3. 3·8·cm. इति ---- श्रीः।